3/21

॥ बौधायश्रौतेधानप्रारंभः श्रीरामसमर्थ ॥ छ

 Boudhayan anedhana prarambha Shree Rama-Samartha

श्रीगणेशायनमः॥ अथाग्न्याधानंनिरूप्यते॥ तस्यकालः शिशिरवसंतग्रीष्मऋतवः नभमासोवामा
र्गशीर्षसहमासोवा स्याधिकारिजातपुत्रः पौर्णमास्यमावास्यायजनीयास्तिथयः कृत्तिकारोहि
णीपुनर्वसुपूर्वोत्तराफल्गुनीचित्रनक्षत्राणिमृगशीर्षविशाखप्रोष्ठपदश्रवणानुराधाअपीति
केचित्॥ अत्ररोहिणीमुख्या। वैशाखामावास्ययायुक्तामुख्यतमा। ऋतुनक्षत्रपर्वयोगःप्रधानं।
रोहिणीयुक्तयजनीयोपवसथोवा॥ तदभावेऋतुनक्षत्रयोगएवतत्रापिपूर्वपक्षएव। ऋतुपर्वणो
र्योगोवा॥ आर्त्तोधानेतुनक्षत्रपर्वननियमः॥ सोमपूर्वेतुआधानंदिनएवयथादीक्षाभवति।
तथातत्सर्वकालएव। एषुअन्यतरत्राग्नीनाधास्यमानोब्राह्मणानुज्ञातःसपत्नीकःकूष्मांडग
णहोमगोदानादिभिरात्मानंपावयित्वापूर्वेद्युर्नांदीश्राद्धानंतरंरात्राउदकशांतिंप्रतिसरबंधं
चविधायसोमाधानेनपृथक्श्वोभूतेस्नानपवनमंत्राचममंत्रप्रोक्षणानिकुर्यात्॥ ऋत्विज न
श्चस्नानादिचतुष्टयंकुर्युः॥ ततःपुण्याहंवाचयेत्॥ तत्राग्निःप्रीयतामितिविशेषः। ततऔपासना
ग्नेःपश्चात्सांकूलेषुदर्भेषुपत्नीयजमानोउपविशतः॥ उत्तरतःपतिर्दक्षिणतःपत्नीऋत्विजस्तयो

रुत्तरतः प्राङ्मुखाउपविशंति। ततः पत्नीयजमानौ जपतः। या॰ पुरस्तादित्यादिनिविष्टमिस्यंतं। त
तः सर्वकामोऽग्नीनाधास्य इति मनसा त्रिः संकल्प्य त्रिः रुच्चैर्वदेत्। सोमपर्वणि तु सोमेन यक्ष्यमाणः सर्वका
म इति विशेषः। वरणार्हानृत्विजः प्रत्याह। तन्मे ऋध्यतां तन्मे समृध्यतां तन्मे संपद्यतां कामः भर्गो मे वोचो
मे ऋत्विजः॥ तन्ते ऋध्यतां तन्ते समृध्यतां तन्ते संपद्यतां काम इति यजमानं ओं तथेति वक्ति। अथर्त्विग्वरणं
असावहमध्वर्युणा त्वागच्छामि याजयतु मा भवान् ब्रह्मत्वेन हौत्रेण उद्गात्रेणाग्न्याधेयकर्मणे साधिना॥
पादाउपसंगृह्य। तत्राश्वलायनो यजमानः स्वसूत्रानुसारेण ब्रह्मादीनृत्विजो वृणीते। भूइमामे ब्रह्मा
स मे ब्रह्मा। ब्रह्माणं त्वा देवदत्तशर्माणं वृणे इति ब्रह्माणं। ब्रह्मा रतो जपति। महन्मे वोचो भर्गो मे वोचो
भर्गो मे वोचो यशो मे वोचः स्तोमं मे वोचः क्लृप्तिं मे वोचो भुक्तिं मे वोचः तृप्तिं मे वोचः सर्वं मे वोच इति जपि
त्वा याजयितृत्वे तु। तन्मामवतु तन्माविशतु तेन भुक्षिषीयेति जपित्वा ब्रह्मा प्रतिजानीते
बृहद्मास्ते ब्रह्मा स ते ब्रह्मा ब्रह्माहं ते मानुषः। यजमानो होतारं वृणीते। अग्निर्मे होता स मे होता होता
रं त्वामुं वृणे इति। होतामहन्म इत्यादि जपित्वा अग्निष्टे होता स ते होता होताहं ते मानुष इति प्रतिजानीते।

यजमानोध्वर्युंवृणीते।आदित्सोमेध्वर्युःसमेध्वर्युरध्वर्युंत्वामुंवृणेइति अध्वर्युर्वृतोजपति।आदित्योदे
वोदैवोध्वर्युःसतेध्वर्युरध्वर्युरहंतेमानुषइतिस्तेनानुमतःकर्मैवाहंकरिष्यामिमहन्मेवोचो।यशोमे
वोचोभर्गोमेवोचोभर्गोमेवोचस्तपोमेवोचस्तोमंमेवोचःक्लृप्तिंमेवोचोभुक्तिंमेवोचोविश्वंमेवोचः
सर्वंमेवोचःसर्वक।प्राणंमेवोचस्तन्मामवतुतन्माविशतुतन्माजिन्वतुतेनभुक्षीषीयदेवादेवमे
त्विसोमःसोममेस्यांतथेति।यजमानोस्मिन्कर्मण्यग्नीध्रंत्वामहंवृणइत्याग्नीध्रंवृणीतेसभविष्यामि
त्याह।बौधायनस्तुयजमानःसर्वाःस्वशाखानुसारेणवृणीते।तेचनयाप्रस्तुतः।अथयजमानःपदा
न र्थानुसमयेकांडानुसमयेवाहयेत्।एकविंशतिदर्भमयंविष्टरंत्रिर्निवेदयतिविष्टरइतिऋत्विगुदग
ग्रेतस्मिन्नुपविशति॥अहंवर्ष्मसजातानांविद्युतामिवसूर्यः।इदंतमधितिष्ठामियोमाकश्चाभिदा
सति॥यजमानेनपाद्यउदकेत्रिर्निवेदितेदक्षिणंपादंप्रक्षालनार्थंप्रयच्छतिततःसर्व्यंगंधपुष्पाद्य २
न्वितजलरूपेअर्घ्येत्रिर्निवेदिते।तदंजलिनाप्रतिगृह्य।आचमनीयजलेत्रिर्निवेदितेसावशेषंतदा
चामति।अमृतोपस्तरणमसीतिरध्यर्थंपुनरन्येनजलेनाचामतिमधुमिश्रेसर्पिर्मिश्रेदध्यनिस

पिधानेमधुपर्केत्रिर्निवेदितेआह्रियमाणंतंईक्षते।मित्रस्यत्वाचक्षुषाप्रतीक्षेअंजलिनाप्रतिगृह्णातिदे
वस्यत्वासवितुः प्रतिगृह्णामि।अवेक्षतेमधुवाताऋतायतेत्यृचेनावेक्ष्यसव्येपाणौकृत्वानामिकयाचांगुष्ठेनच
त्रिः प्रदक्षिणमालोड्यतदेकदेशंवसवस्त्वागायत्रेणछंदसाभक्षयंत्वितिपुरस्तान्निमार्ष्टि।रुद्रास्त्वा
त्रैष्टुभेनछंदसाभक्षयंत्वितिदक्षिणतआदित्यास्त्वाजागतेनछंदसाभक्षयंत्वितिपश्चाद्विश्वेत्वादेवा
अनुष्टुभेनछंदसाभक्षयंत्वित्युत्तरतः।मध्याद्गृहीत्वात्रिरुत्क्षिपतिभूतेभ्यस्त्वेतित्रिः।ततोमधुपर्कपा
त्रंभूमौनिधायैकदेशंहस्तेगृहीत्वाभक्षयतिविराजोदोहमसिशुध्यर्थमाचम्यपुनरेकदेशंगृहीत्वाभक्ष
यति।विराजोदोहमशीयशुध्यर्थमाचम्यपुनरेकदेशंगृहीत्वाभक्षयतिमयिदोहःपद्यायैविराजइति
तृतीयप्राशनसशेषमशेषंवा।अवशिष्टमुदगुपविष्टायब्राह्मणायप्रयच्छेदप्सुवाक्षिपेत्।शुध्यर्थ
माचम्यपूर्वंनिवेदिताचमनीयेनसशेषमाचमतिअमृतापिधानमसिशुध्यर्थमाचम्यावशेषितेना
चामतिसत्यंयशःश्रीर्मयिश्रीःश्रयतांशुध्यर्थमाचम्यपुनःकर्मांगमाचमनंकुर्यात्।गांवात्रिर्निवेदि

तायांमा ताकुः द्वाणोमितिजपित्वोमुखंजनेतिवेदेत्। यजमानोगंधपुष्पयज्ञोपवीतवस्त्रालंकारादिभिः
सं जयित्वामधुपर्कांगभोजनमृत्विजेददद्यात्। एवंब्रह्मादीन्निर्हपित्वा ध्वर्युंतच्छाखयार्हयेत्॥ इत्याश्वला
यनमधुपर्कः॥ अथइत्सनंतरंतत्रापंबौधायनमधुपर्कः॥ यजमानः शुक्षागारमध्येएरकासनेतत्द
दशामहतंबहुगुणंवासआस्तीर्यतत्रप्राङ्मुखंवृतमृत्विजमुपवेश्यतस्यैवागारस्यैशानदिग्भा
गेषुस्थूलापिधानसहितंकांस्यपात्रंचतुरःकूर्चान्दधिमधुघृतमापःपयश्चपृथक्पात्रेषुवस्त्रयुगं
कुंडलयुगंभोजनपात्रंस्रगलंकरणीयमुदकुंभंप्रोक्षणीपात्रंउदपात्रंव्रीहीन्यवान्वाइत्यादिसाद
येत्॥ यस्यागोर्मधुपर्कार्थेपयआनीतंतांदक्षिणार्थंवान्यांसन्निधापयेत्। पवित्रेकृत्वा। प्रोक्षणीपा
त्रमुत्तानीकृत्यप्रोक्ष्यतस्मिंस्तिरःपवित्रमपआनीयत्रिरुत्पूयान्यानिपात्राण्युत्तानीकृत्यत्रिःप्रोक्ष्य ३
कांस्यपात्रंकूर्चेणापिधायतस्मिंस्तिरःपवित्रंमध्वानीयदध्यानयीत। अनंतरंघृतमानीयपयआन
यति। ततोपआनीयवर्षोपिसातेजोमयोनापिधायकूर्चमृत्विजेप्रयच्छतिकूर्चःकूर्चःकूर्चइतित्रऋत्विक्
सुकूर्चइत्युक्त्वाप्रतिगृह्यप्रदक्षिणंपरिभ्राम्यतमासनस्याधस्तात्प्रपंचपुरस्तादुपगृह्णाति। राष्ट्रभृदस्या

र्यसंदीमात्वघोषंमितियजमानउदकपात्रेअपआनीयकूर्चाभ्यामधस्तादुपरिष्टाच्चपरिगृह्यपाद्याआपइ
तिप्राह।ऋत्विक्ताअभिमंत्रयतेआपःपादावनेजनीर्द्विषंतंनाशयंतुमे।।अस्मिन्कुले ब्रह्मवर्चस्यसा
णं नीतितेनोदक्षिपादंपूर्वंप्रसारयतितेनोवामंस्त्रीप्रक्षालयतिपुमानभिषिंचति।विपरीतंवा।ऋत्विक्पा
दावक्तनेक्तुः।पाणीसंमृशति।मयिमहोमयिभर्गोमयियशइतिअपउपस्पृश्य।आत्मानउरोभिमृशति।
मयींद्रियंवीर्यमित्युपस्पृशति।यजमानपात्रांतरेपआनीयव्रीहिभिर्यवैर्वासंमिश्र्यकूर्चाभ्यांपरिगृ
ह्यार्हणीयाअपइतिप्राह।ऋत्विक्ताअभिमंत्रयपठ्यात्।आमागन्यशसावर्चसासंसृजपयसातेजसाच।
तंमाप्रियंप्रजानांकुर्वधिपतिंपशूनामितियजमानस्तासामेकदेशंऋत्विगंजलावानयति।ऋत्वि
गानीयमानमेकदेशमनुमंत्रयते।विराजोसिविराजोदोहममपद्याचविराजः।यजमानस्ताःपराची
र्नीयमानाआपोनुमंत्रयतेसमुद्रंवःप्रहिणोम्यक्षितास्वांयोनिमपिगच्छत।।अछिद्रःप्रजयाम्यासे
मापरासेचिमत्पयइतिपुनरपिपात्रांतरेपआनीयकूर्चाभ्यांपरिगृह्योपस्तरणीयाआपइतिःप्रत्याह।
ऋत्विक्ताआदायअमृतोपस्तरणमसीतिसकृन्मंत्रसकृत्तास्त्रिःपिबेत्द्विःपरिमृजेत्।आचमनशेषस्तमा

पयेत् ॥ यजमानः कूर्चाभ्यां मधुपर्कपात्रं । परिगृह्य मधुपर्क इति प्राह । ऋत्विक् तमनुमंत्रयते । त्रय्यै विद्यायै यशोसि
यशसो यशोसी ब्रह्मणो दीप्तिरसि । तं मा प्रापयं प्रजानां कुर्वधिपतिं पशूनाम् इति ॥ तमुभाभ्यां हस्ताभ्यां प्रतिगृह्णा भा
तीति । पिधानं दूरीकृत्य तत्र किंचित्तृणादिकमापतितं तमंगुष्ठेनोपकनिष्ठिकया चोपसंगृह्य नैऋत्यां दिशि नि
रस्यति नेष्टाविद्धं । रुद्रनामियाते घोरा तन्नूस्तया तमाविशायोस्मां द्वे । ष्टियं च वयं द्विष्म इति अप उपस्पृ
श्य सर्वाभिरंगुलीभिर्मिश्रीकृत्य प्राश्नाति । यन्मधुनो मधव्यं परममनाद्यं वीर्यं तेनाहं मधुनो मधव्येन पर
मेणान्नाद्येन वीर्येण परमोन्नादो मधव्योसानीति सकृदेवमंत्रमुक्त्वा त्रिः प्राश्नाति प्राशितमनु च त्रिः पिब
ति ॥ शेषमात्मनः प्रियाय दद्यात् यजमानः पात्रान्तरे प आनीय कूर्चाभ्यां परिगृह्य पिधानी या आप इति प्राह ऋ
त्विक् ताः पिबेदमृतापिधानमसीति उदङ्मुखं पूर्ववदाचम्य प्राङ्मुख उपविशेत् ॥ यजमानः कृतांजलिर्गौ ४
नं रितित्रिर्ब्रूयाति ऋत्विक् गोरस्यपहतपाप्मा पपाप्मॉनुदममामुष्य च ॥ इति यजमानस्य षष्ठ्यंतं नाम गृ
ह्णाति तामुत्सृज्य स्वनुमंत्रयते ॥ गोर्धेनुर्भव्या माता रुद्राणामिति पिबतूदकं तृणान्यत्तु ओमुत्सृजतेति । यज
मानः । मिश्रान्नं सिद्धान्नं भूतमिति प्राह । ऋत्विक् सुभूतमित्युक्त्वा तदनुमंत्रयते ॥ भूतं सा विराट् तन्मा क्षा

मितन्मेनेन्नीयतन्मुर्वधा ओं कल्प्यतेतितंतम्यतुरोनानागोत्रान्ब्राह्मणान्भोजयतेतिब्रूयात्। तेषुभुक्तवत्सुभो
न जैपात्रेअन्नमस्माउपहरंतितदंविकूर्याम्यातिं। विराजसि। विराडन्नंविराड्विराजोमयिधेह्रीति। यजमानः
आचांतायर्त्विजेवस्त्रयुगंकुंडलयुगंदोगध्रींगांस्त्रगत्नंकरणानियथासंभवंदद्यात्। बौधायनब्रह्मादीना
मप्ययन्नेवबौधायनमधुपर्कः॥ ॥अथाग्न्यायतनं॥ ॥इष्टदेशेदीर्घचतुरस्त्रंसमचतुरस्त्रंवाप्राग्दक्षि
णद्वारद्वययुक्तं अगारंपरिकल्प्यतन्मध्येगार्हपत्यस्यायतनंपदंपंचदशांगुलं द्विपदस्त्रिपदोवाप्रक्रमः।
एकपदोपीतिकेचित्। द्वादशांगुलः प्रादेशः चतुर्विंशत्यंगुलोरत्निः। गार्हपत्यमध्यादारभ्यद्वादशप्रक्रमेद्वा
दशपदेवाप्रक्रमाष्टकेपदाष्टकेवाआहवनीयमध्यः एषामन्यतमायामां रज्जुंपंचधाषोढावासंभुज्य
षष्ठंसप्तमंवाआगंतुकंसंयोज्योभयतः पाशांकृत्वापुनःपंचधासंभुज्यअपरस्मादंतात्द्वाभागद्वयोनितेलक्षणं
कृत्वागार्हपत्याहवनीयमध्यशंक्वोः पाशौप्रतिमुच्यलक्षणेगृहीत्वालक्षणेनदक्षिणाकृष्यलक्षणेशंकुंनि
हन्यादेवमुत्तरतआर्जवार्थंदक्षिणशंक्वोःरुदग्द्वादशांतिलाधिकांगुलद्वयेशंकुंनिहन्यात्सदक्षिणा
ग्नेर्मध्यः पंचदशांगुलांरज्जुमुत्पयतः पाशांकृत्वाएकंपाशंदक्षिणाग्निमध्यशंकौप्रतिमुच्यतयारज्वामंड

लंपरिलिखेत् मंडलस्यांतरेखामंडलयोः संसर्गप्रदेशौ नियम्योत्तरं पार्श्वमुत्सृजेत् द्वाशिष्ट दक्षिणायेरा
यतनं भवति पंचधाभ्यस्तां रज्जुं विपर्यस्य लक्षणे गृहीत्वोत्तरतश्चाकृष्य लक्षणे शंकुं निहन्यात्। स उत्करो गा
र्हपत्यमध्यशंकावुभयतः पाशौ सार्धत्रयोदशांगुलायामां रज्जुं प्रतिमुच्य तया मंडलं परिलिखेत्तद्गार्हप
त्यस्यायतनमाहवनीमध्यशंकोः पश्चात्सुरत्नाद्यानुपृष्ठ्यं प्रादेशमात्रे शंकुं निहन्यादरत्निद्व्यायामां
रज्जुमुभयतः पाशां कृत्वान्यतरस्मात्पाशादारभ्य द्वादशांगुले षोडशांगुले च लक्षणं कृत्वाहवनीयपूर्वा
परशंकोः पाशौ निधाय द्वितीये लक्षणे गृहीत्वा दक्षिणाकृष्य प्रथमे लक्षणे शंकुं निहन्यादेवमुत्तरतो
रज्जुं व्यस्यैवं दक्षिणत उत्तरतश्चतुरस्रमाहवनीयायतनमाहवनीयस्यापरस्माच्छंकोर्दक्षिणउत्तर
तश्च द्वात्रिंशदंगुले शंकू निहन्यात् श्रोण्याहवनीयस्यापरस्माच्छंकोर्दक्षिणत उत्तरतश्चतुर्विंशत्यंगुले ५
शंकू तावंसौ दक्षिणश्रोण्यंसांतरालरज्जुं द्विगुणामुभयतः पाशां मध्ये सलक्षणां कृत्वा दक्षिणश्रोण्यं
सशंकोः पाशौ प्रतिमुच्य लक्षणेन दक्षिणाकृष्य लक्षणे शंकुं निहन्यादुभौ पाशौ समस्य लक्षणं शंकौ प्र
तिमुच्य मध्यलक्षणेन दक्षिणश्रोणिशंकोरारभ्य दक्षिणांसशंकुं परिलिखेदेवमुत्तरं पार्श्वं परिलिखेदेवं प

र्वेमपरं व पार्श्वं स्वप्रमाणं द्विगुणरज्ज्वा परिलिखेत्तत्संनमनं यदि लघीयसी भूमिस्तदा षण्णवत्यंगुलानि हि
त्वा शंकोर्दक्षिणोत्तरयोरंजसा वृत्तद्वयेन मत्स्यावुत्पाद्य तदार्जवेनोभयतो द्वात्रिंशदंगुले शंकू निहत्यात्तेभ्यो
ऽप्येवमाहवनीयस्यापरस्माच्छंकोर्दक्षिणोत्तरयोश्चतुर्विंशत्यंगुले शंकू तावं सौय द्वाषण्णवत्यंगुलां रज्जुं
द्वाः दत्त्वाथ संभुज्य आगंतुक त्रयोदश चतुर्दश पंचदशेषु चिह्नयित्वा अष्टादशोपाशां विधाय त्रयोदशांशा
यथा पुरस्ताद्भवति तथा षण्णवत्यंगुलानि हित्वाहवनीयापरशंकोः पाशौ प्रतिमुच्य त्रयोदशेन दक्षिण।
त्तरयोराकृष्य चतुर्दशे शंकू निहन्यात्तेभ्यो श्रोणी पाशौ व्यस्य त्रयोदशेन दक्षिणोत्तरयोराकृष्य पंचदशे।
शंकू निहन्यात्तावंसावेवं वेदिं विधाय सर्वतः संनमयेद्दक्षिणश्रोण्यंसशंकोरंजसा दक्षिणतस्सं।
तरालद्वादशांगुलेन शंकू निहत्य तयोरागंतुकत्रयोदशांशाधिकामुभयतःपाशां रज्जुं प्रतिमुच्य तया द
क्षिणं पार्श्वं परिलिखेदेवं सर्वतः प्राकृतां द्व्यंगुलाधिकां प्राकृतपारेव प्रतिमुच्य परिलिखेदित्यपि के
श्चित्। एषा दर्शपौर्णमासिकी वेदिः॥ प्रागेव यज्ञपात्राणि संपादनीयानि तेषां लक्षणान्युच्यंते॥ हस्त्येर

हंसमुखवायसपुछानामन्यतमाकारासेचनवत्त्यः प्रादेशारत्नीबाहूनामन्यतमायामास्त्वकृत्त्वानासेचन
वत्योवृक्षमूलदंडाअग्रासेचनाआयामार्धदंडाअवशिष्टायामार्धेयःथाशो। मंत्रिवतुः पंचाषंगुलबिल
पुष्कराअवशिष्टाग्रा अग्निहोत्रहवणी जुहूपभृत्ध्रुवास्वसाहोमहवनी एषदाज्यग्रहण्या याबाहुमात्री
षु प्रादेशमध्ये बिलाग्रेसंपाद्यावशिष्टोदंडः कार्यः स्रुवस्त्वरत्निमात्रो गुष्ठपर्वमात्रंवृत्तबिलो ध्रुवि
मेक्षणेअरत्निमात्रेचतुरंगुलंविस्तृतसमाग्रेउलूखलं प्रादेशारत्निद्ध्यरत्न्यन्यतमायामं तदर्धविस्ता
रं तदायामत्रिगुणमूसलेसेः प्राशित्रहरणं प्रादेशमात्रं गोकर्णाकृति चतुरंगुलदंडं ॥ स्फ्यः खड्गाकारश्च
तुरंगुलविस्तारोरत्निमात्रश्चमसाः प्रादेशमात्राश्चतुरंगुलदंडा अष्टांगुल चतुरस्रबिलाः शम्याः ष
ट्त्रिंशदंगुला षडंगुलकुब्जा पात्री दारुपात्रा वरत्नीमात्रे चतुरंगुलदंडावशिष्टबिले गोदोहनं चतु ६
रंगुलदंडं प्रादेशमात्रमष्टांगुल वर्तुलबिलं पिधानमपितादृशं दंडरहितं ध्रुवाग्निहोत्रहवण्यौ वैकं
कत्यौ जुहूवसाहोमहवनी प्रवरण्यः पालाश्य उपभृत् एषदाज्यग्रहण्या वाश्वत्थ्यो स्फ्यशम्यास्रुव

प्राशित्रमुसलानिखादिरणीनराण्यपिहोमार्थानिवारणानिसौमिकान्यमसानिन्यग्रोधाऔदुंबरावा
सौमिकग्रहदधिघर्मधानीयप्रवर्ग्यपात्राण्यौदुंबराण्यन्यानिकर्मविशेषाणियत्तानितत्प्रकरणेवक्ष्यंते
आरण्योआधानकालेयथामुख्योभवतस्तथापूर्वमेवसंपादनीयेतत्रायंविधिःआधानात्पूर्वंशरदिहे
मंतेवापूर्वस्मि-न्दिनेकृतमंगलःपुण्याहंवाचयित्वाग्रामाद्बहिःप्राच्यांवादिशामुपनिष्क्रम्ययत्कु
त्रविद्यमानश्वेतप्ररोहोनातिजरोऽश्वत्थवृक्षःशमीगर्भोवाअशमीगर्भोविद्यतेतत्रगत्वाचतुरंगुलोत्सेधे
द्वादशांगुलविस्तारेषोडशांगुलायामेअपिवासर्वतःप्रादेशमात्रोवाचतुरंगुलोत्सेधेअधरोत्तरारणी
आहरेत् अरण्योत्तराधरभावोविदारितवृक्षस्कंधोत्तराधरभागनिबंधनोविदारितेयथेच्छमुत्तरारण्याः त
प्रसन्नभागात्प्रजननंसंकुर्यात् उत्तरारण्यवसानेअधरारण्या एवकुर्यात् ॥ ॥अथाध्वर्युर्दपेज
घ्नेनगार्हपत्यस्थानमुपविश्ययजपंतिइडांदेवहूर्मनुः मदंत्विस्यध्वर्युस्फ्यमादाययजमानपत्नीभ्यां
सहवेद्युत्तरावेंतरेणप्रपद्ययजमानेनान्वारब्धोगार्हपत्यस्यायतनमुद्धंति ॥ उद्धंन्यमानमस्या

म
अमेध्यं पाप्मानं यजमानस्य हंतु॥ शिवा नः संतु प्रदिशश्चतस्रः शं नो माता पृथिवी तोकसाता। इति अथैनमद्भिरवो
क्षति॥ शं नो देवीरभिष्टय आपो भवंतु पीतये। शंयोरभिस्रवंतु नः। इति एवमन्वाहार्यपचनमाहवनीयं च। उद्धननादि
विराजक्रमोपस्थानांतं सर्वं सह यजमानं। अंतर्वेद्यानुपूर्व्येण पञ्च पार्थिवान्यानस्य सांग्रहसंभारानेकैकेन यजु
षा संभरंति। वैश्वानरस्य रूपं पृथिव्यां परिस्रसा। स्योनमाविशंतु नः। इति सिकताः। यदिदं दिवो यददः पृथिव्याः संज
ज्ञाने रोदसी संबभूवतुः। ऊषान्कृष्णमवतु कृष्णमूषा इहोभयोर्यज्ञियमागमिष्ठाः॥ इत्यूषान्। ऊतीः कुर्वाणो यत्पृथि
वीमचरो गुहाकारमाखुरूपं प्रतीत्य। तत्ते न्यक्तमिह संभरंतः शतं जीवेम शरदः सवीराः। इत्याखुकरं। ऊर्जं पृथिव्या
रसमाभरंतः शतं जीवेम शरदः पुरूचीः। वम्रीभिरनुवित्तं गुहासु श्रोत्रं त उर्व्यबधिरा भवामः। इति वल्मीकवपां॥ प्रजापति
सृष्टानां प्रजानां क्षुधोपहत्यै सुवितं नो अस्तु। उपप्रभिन्नमिषमूर्जं प्रजाभ्यः सूदं गृहेभ्यो रसमाभरामि। इति सूदं। यस्य रू
पं बिभ्रदिमामविंदद्गुहा प्रविष्टां सरिरस्य मध्ये। तस्येदं विहतमाभरंतोऽछंबट्कारमस्या विधेम॥ इति वराहविहितं।
यत्पर्यपश्यत्सरिरस्य मध्य उर्वीमपश्यज्जगतः प्रतिष्ठां। तत्पुष्करस्यायतनाद्धि जातं पर्णं पृथिव्याः प्रथनं हरामि। ७
इति पुष्करपर्णं॥ याभिरदृंहज्जगतः प्रतिष्ठामुर्वीमिमां विश्वजनस्य भर्त्रीं। ता नः शिवाः शर्कराः संतु सर्वाः। इति शर्कराः।
अग्नेरेतश्चंद्रं हिरण्यमद्भ्यः संभूतममृतं प्रजासु। तत्संभरन्नुत्तरतो निधायाति प्रयच्छन्दुरितिं तरेयमिति चीणि राजतानि

त्रीणि सौवर्णानि निषट्त्राकत्वा निदधाति। अश्वो रूपं कृत्वा यदश्वत्थे ऽतिष्ठः संवत्सरं देवेभ्यो निलाय। तत्ते न्यक्तमिह सं
भरंतः शतं जीवेम शरदः सवीराः। इत्यश्वत्थं। ऊर्जः पृथिव्या अध्युत्थितो ऽसि वनस्पते शतवल्शो विरोह। त्वया वयमिषमूर्जं
हतो मदंतो रायस्पोषेण समिषा मदेम॥ इत्यौदुंबरं॥ गायत्र्या ह्रियमाणाश्च यत्ते पर्णमपतत्तृतीयस्यै दिवो ऽधि। सो ऽयं
पर्णः सोमपर्णाद्धि जातस्ततो हरामि सोमपीथस्यावरुध्यै। देवानां ब्रह्मवादं वदतां यदुपाशृण्वोः सुश्रवा वै श्रुतो ऽसि। त
तो मामाविशतु ब्रह्मवर्चसं तत्संभरंस्तदवरुंधीय साक्षात्। इति द्वाभ्यां पर्णं॥ यया ते सृष्टस्याग्नेर्हेतिमशमयत्प्रजा
पतिः। तामिमामप्रदाहाय शमीं शांत्यै हराम्यहं। इति शमीं। यत्ते सृष्टस्य यतो विकंकतं भा आर्छज्जातवेदः। तया भासा संमित
उरुं नो लोकमनुप्रभाहि। इति वैकंकतं। यत्ते तांतस्य हृदयमाछिंदं जातवेदो मरुतोद्भिस्तमयित्वा। एतत्ते तदरणेः संभरा
मि सात्मा अग्ने सहृदयो भवेह। इत्यशनिहतं। विरिंयादश्वत्थात्संभृता बृहत्यः शरीरमभिसंस्कृता स्थ। प्रजापति
ना यज्ञमुखेन संमितास्तिस्रस्त्रिवृद्भिर्मिथुनाः प्रजात्यै। इति विरिंयाश्वत्थस्य समिधः। याते अग्न ओजस्विनी तनूरो
षधीषु प्रविष्टा तां त इह संभरामि। इति मुंजकुलायं। अश्वत्थाद्धव्यवाहाद्धि जाता तामग्ने तनूं यज्ञियां संभरामि।
शांतयोनिं शमीगर्भमग्नये प्रजनयितवे। यो अश्वत्थः शमीगर्भ आरुरोह त्वे सचा। तं ते हरामि ब्रह्मणा यज्ञियैः
केतुभिः सह। इति द्वाभ्यामरणी। यज्ञियैः केतुभिः इति सर्वाण्यपि पात्राणि। यजमान आश्वलायनश्चेत्। यो अ

है

संभारान् शमित्

स्युस: शमीगर्भआरुरोहत्वे सचा। तं त्वाहरामि ब्रह्मणा यज्ञियैः केतुभिः सहेति द्वितीयोपि मंत्रः॥ यद्यनेनानुपूर्व्ये
णाहृत्तेन संभृतान्पुनरपि प्रत्येकं संभरति प्रति संभारं पुनः संभरामि त्वा। यत्ते सम भरं जातवेदो यथा शरीरं भूतेषु न्य
क्तं। स संभृतः सीदतु शिवः प्रजाभ्य उरुं नो लोकमनु नेषि विद्वान्। इति। ततो मुंजकुलायधि त्रयाणां श्वेतं हिरण्यरजतं कला त्रा
रणिव्यामिरिक्तां संभारान् स्वधां विभज्य निदध्यात्। अथ गोपितृयज्ञः। अध्वर्युः प्राङ्मुखासीनस्य यजमानस्य द
क्षिणगोदानदेशप्रदेशं पाणि त्रीणि दर्भपिंजूलानि निधाय। केशावपनादि नखनिकृंतनांतं करोति वपेत्स्वधिपे देवेन
सवित्रा प्रसूता ब्राह्मणा स ऽ शितो हं इति यजमान उक्त्वा वपनदेशमभिमंत्रयते। यानि महत्तमूर्ध्वं लोमानि तानि मे स्व
स्त्ययेसं [illegible] लिखितिपतया अपि मं च वर्जे केशाद्यानि तिरस्कृतोपपक्षादिवापनं। यजमानमुदकुंभेनाभिषिंचन्वाचयति।
मु इमा आपः शिवाः संतु ... तं प्रवहंतु मे। सुधाः प्रयुंजीमहि क्रतूनिति। तूष्णीं पत्नीं स्नापयति स्नातौ पत्नीयजमानौ
प्रागदेशां गत्वाहतं वासः परिधाय पालेश्च स्वाजाते। अथाध्वर्युर्यजमानमेकविंशत्या दर्भपिंजूलैः स्वधाविभक्तैः त्रिरो
नाभिं गुल्फं च पावयित्वोदपात्रमादाय यजमानपत्नीभ्यां सह नैऋतीं दिशं गत्वा चतुष्पथे उदपात्रे आत्मानमवेक्ष ६
माणं यजमानं पत्न्यामपि आत्मानमवेक्षमाणायां ब्रह्माणं दक्षिणतः आसीनं वाचयति। सिंहे मे मन्युर्व्याघ्रे मे यजमानं
नराय योरके मे क्षुत् दम्भे मे घस्तिर्धन्वनि मे पिपासा राजयक्ष्मे मे श्वानयाश्मनि मेतं द्विर्गर्दभे मे स्त्रिः शल्यके मे ह्रीरस्य

श्लेष्मवेपथुः कूर्मेमेगरोगोबस्तमेपक्सर्याप्रियेमेम्र स्नुर्भ्रातृव्येमेणाध्मा सपत्नेमेनि ऋ्रतिर्दुष्की तैर्मे व्यृद्धिः परस्त्रीतमे समृद्धिः
खड्गेमआर्त्तिर्गर्दभेयमआंध्यंगौरेमेबाधिर्यमक्षेशोकोगोधायांमेस्वप्नदोजरायांमेहिमः कृकलासाकुनौमेभीरुताकत्रीमेपापेहंगंध
के उलूमेम्वभ्यसूक्रोकेमईर्ष्यामर्कटेमेदुर्हर्द्धिः कुलालेमेमन्युः स्थालीमेमध्योक्षुमेनृहस्त्वैरीमेश्रमोव्यान्मआंध्यकोत्रो
मेगंधः रुमायांमेलंकारः सूकरेमेक्लूदथुः श्वदाखुनिमेस्वप्नोजगरेमेदुस्वप्नोविद्युतिमेस्मयन्नोलोभायांमेक्लूदः शाल
मेमेपाप्मालक्ष्मीः स्त्रीषुमेनृतंमज्ञासुमेकर्कशोब्रासेमईस्याम्रडेमेस्तेयंवैश्येमेकार्मकृत्संराजन्यबंधुनिमेक्रानांनि
षादेमेब्रह्महस्याक्लिंगेमेस्त्रःवेथुरुलललेमेविलास्लडद्रिणिमेबमनिः किंपुरुषेमेरोदोद्धी पिनिमेनिष्टपद्मस्तिनिमेकि
ल्बासः भुनिमेदौरग्रंल्लावन्येषुमेम्लेछोधिदेहेषुमेवीपद्येमद्वार्वेषुमेग्लौर्मज्जवत्सुमेतप्राद्दुंदुभौमेकाशिकास्वा
कुक्षुमेपितंकालिंगेषुमेमेध्ममश्वतयांमिप्रजस्तापुंश्चल्यांमेदुश्चरित्रमाखुनिमेदंतरोगोमक्षिकायांमेम्व[illegible]त्राःभुके दर्के
मेहरिमामयूरेमेजंत्मावृषेमेजराबाषेमेपापवादोप्सुमेभ्रमोब्रह्मोज्झमेकिल्बिषं।अपेहिपाप्मन्पुनरपनाश्रि
म नोभवानः पापृन्स्तुकृतस्यलोकेपाप्मन्धेह्यविहृतोयोनःपाप्मन्नजहातितमुत्वाजहिमोवयमन्यत्रास्मन्निविशताद्र
सहस्राक्षोअमर्त्यायोनोद्वेषत्सरिष्यतुयमुद्विष्मस्तमुजहीति।अथैताआपोंजलिनोपरसंहंतिसुमित्रानआपओ

षधयः संवितिनैऋतीं दिशं प्रतिक्षिपति दुर्मित्रास्तस्मै भूयासुर्योस्मान्द्वेष्टि यं च वयं द्विष्म इति पात्रं परास्याप उपस्पृश्या
नवेक्षमाणा यथागतं सर्वे प्रदक्षिणमावृत्य स्वगृहं हस्तपादान्प्रक्षाल्याचमनं कुर्युः। अथाध्वर्युः पवमानः सुवर्जन इत्से
तमनुवाकं यजमानं वाचयन्नात्मानं पत्नीं यजमानं चाद्भिः प्रस्तरं च प्रोक्षति। अथ यजमानः। प्राचीनावीती गोपितृयज्ञं क
रिष्य इति संकल्प्य लौकिकमग्निमन्वाहार्यपचने प्रणीय ज्वलयित्वा परिस्तीर्य पवित्रे कृत्वा आज्यस्थालीं स्रुवं च साद
धित्वा प्रोक्ष्याज्यं स्मार्त्तवत्संस्कृत्यान्वाहार्यपचनस्योत्तरतः सादयति॥ चतुरुद्दकुंभानौदुंबरीं दर्वीं दक्षिणतोग्नेः स चमसद्वयि
रुद्राक्षिं न्नं बर्हिरेरकोपबर्हणे अंजनाभ्यंजने पात्रांतरे आज्यं ५ स्फ्यं दर्व्यां व्यतिरिक्तं सूत्रं प्रक्षालितं उलूखलमुस त्वा
ले कृष्णाजिनं शूर्पं चरुस्थालीं मेक्षणमाज्यस्थालीं प्रोक्षणीमिति। एरकादीनां दक्षिणतो दूरं तूष्णीं स्थलमायि देवनस्थानं कृत्वा
रणे स्फ्येनो द्रुसावोक्ष्य एकोनपंचाशत्संख्याकानक्षान्वैभीतकान्निधाय तद्दक्षिणतः पिंडनिर्वपणस्थाने स्फ्येन द
क्षिणापवर्गां रेखां करोति। अपहता असुरा रक्षांसि पिशाचा ये क्षयंति पृथिवीमनु। अन्यत्रेतो गच्छंतु यत्रैतेषां गतं म १
नः इति। अथैनामद्भिरवोक्षति। उदीरतामवर उत्परास उन्मध्यमाः पितरः सोम्यासः। असुं य ईयुरवृका ऋतज्ञास्ते नोवं
तु पितरो हवेष्विति। अथोल्मुकं उल्मुकमादत्ते ये आददाना स्वधया न बानि पिश्राणि रूपाण्यसुराश्चरंति। परापुरो निपु

रोये भरंत्य्अग्निष्टानस्मान्प्रणुनोत्कु यज्ञादिति। तेनोल्मुकं देशमभिनयति। अग्निः पावकः सुदिनानि कृण्वन्नित्तो सुरान्नु
तृ दनो हरमो कसः। पितॄणां ये वर्णं कृत्वहं भागमिछं तेइति। उल्मुकमग्निसमीपे प्रयडः दध्यात्। अस्मिन्नाज्यवेदं प्रस्थोत
यति। ततउथने बदेशोदक्षिणाग्रबर्हिस्तृणाति। सकृदाछिन्नं बर्हिरूर्णा मृदु स्योनं पितृभ्यस्त्वा स्तृणाम्यहं। अस्मिन्त्सी
दंतु मे पितरः सोम्याः पितामहाः प्रपितामहाश्चानुगैः सह। अथ बर्हिर्हस्तउत्थाय प्रांजलिः प्रह्वो दक्षिणामुखः पि
तॄनावाहयति। उदीरणा इहसंतु नः सोम्याः पितरः पितामहाः प्रपितामहाश्चानुगैः सह। अस्तुंगमाः सत्यपु
ञ्जोरकास्सआनोहवं पितरो यागमं तु। इहगछं तु पितरो हविरत्तवे। अस्मिन्यज्ञे बर्हिष्या निषद्य मावीरः प्रमएपु पे
नक्। इति बर्हिर्निधाय पितॄणां पुरस्ताद्दक्षिणतो वा एरकोपबर्हणे दक्षिणोत्तरे निदधाति। आसन्नं शयनं चेमे ९
तयोः सोम्यासआगताः। प्रियाज्जनायनो भूत्वा शिवा भवथस्वंकराः। इति एकैौदकुंभार्धेन तूल्हे पिंडुछले मार्जयति। नो
अथैभ्यः पानान्याहरति मधुपानं क्षीरपानं सक्तुपानमेषामन्यतमद्वा। सक्तुपानमद्भिः पयसा वामिश्रितं भवति।
एकैकं च पात्रद्वये संभरणीयं। तत्र षट्सु द्वयोर्वा त्रितयमेकं वा ब्राह्मणेभ्यः। अवशिष्टं त्रितयमेकं वा त्रस्येकं त्रि
धा कृत्वा एतद्वः पितरः पानमेतद्वः पितामहाः पानमेतद्वः प्रपितामहाः पानमिति तिनवकृत्वस्त्रिर्वा दद्यात्।

हव पूर्वमार्जितत्रोषेणोदकुंभेनतत्स्थलींमार्जयति।अथासादितानक्षान्परितश्चत्वारः पितापुत्राःपूर्वादिप्रादक्षिण्येनयथा
ज्येष्ठमुपविशंति।अनुज्ञोवक्ष्यदुत्तरदेशे।तत्रद्वादशाक्षान्पिताकर्षति।एवंज्येष्ठानुज्ञोतेत्रयोविजयिनः।समसंख्या
कर्षणात्।अवशिष्टांस्त्रयोदशकनीयानाकर्षतिसपराजितोविषमसंख्याकर्षणात्।अथयदिद्वौपुत्रौस्यातां
तदापितान्चतुर्विंशतिमक्षान्द्विरावस्याहरेत्।अथैकःपुत्रस्तदाआयात्पत्नीयाअत्रापिद्विरायामःपिता।।पुत्रो
द्वादशाक्षान्कर्षतित्रयोदशाक्षान्भार्येतिसापराजितापुत्राभावेजायापत्नीएवंप्रत्येकंद्वावारमाकर्षतः।अत्रा
पिभार्यैवपराजिताभवति।कृतंकृतमितिमंत्रमुच्चारयंतोक्षान्कर्षंति।कृतंकृतमितिपराजितोजपेद्द्यूतावसा
नेसर्वेषांजपइत्यन्ये।एवंवारत्रयंकृत्वाद्यूतओदनेस्युक्तोतिष्ठंति।यद्वापराजितावशिष्टेषुपुनःपुनर्द्यूतप्रसंगे
नावशिष्टानामपिपराजयःपितैवविजयीजितमोदनंनिर्वपतिपितृभ्यस्त्वापितामहेभ्यस्त्वाप्रपितामहेभ्यस्त्वाजु
ष्टमुपाकरोमीतिसकृदेव।प्रोक्षतिपितृभ्योजुष्टंप्रोक्षामीति।निर्वापप्रोक्षणोत्तरंस्त्रीवाकृष्णाजिनउलूखलमुस १०
लेनिधायावहत्यस्तुफलीकृतान्प्रक्षाल्यतंदुलोदकंपात्रांतरेनिधायचरुंमाज्यंचाधिश्रित्योभयंपर्यग्निकृ
त्वचरोरुपरिष्टात्मध्येष्टंप्रभृतमाज्यमानीयस्रुवंदर्वींचसंमृज्यचरुमभिघार्योद्वास्यवपाहोमार्थंचरोरेकं

पिंडमुद्धृत्य पंचस्रुवाहुतीर्जुहोति। याः प्राचीः संभवंत्याप उत्तरतश्च याः। अद्भिर्विश्वस्य भुवनस्य धर्त्रीभिरंतरन्यं
पितुर्दधे स्वधा नमः स्वाहा। पित्र इदं। अंतर्दधे पर्वतैरंतर्मह्या पृथिव्या। दिवा दिग्भिरनंताभिरूतिभिरंतरन्यं पि
तामहाद्दधे स्वधा नमः स्वाहा। पितामहायेदं॥ अंतर्दध ऋतुभिः सर्वैरहोरात्रैः ससंधिकैः। अर्धमासैश्च मासैश्चां
तरन्यं प्रपितामहाद्दधे स्वधा नमः स्वाहा। प्रपितामहायेदं॥ यन्मे माता प्रलुलोभ चरत्यननुव्रता॥ तन्मे रेतः पि
ता वृंक्तां माभुरन्योऽवपद्यतां स्वधा नमः स्वाहा। पित्र इदं॥ यद्वः क्रव्यादंगमदहल्लोकान्नयन्प्रणयं जातवेदाः॥
तद्वो अहं पुनरावेशयाम्यरिष्टाः सर्वैरंगैः संभवंतु पितरः स्वधा नमः स्वाहा। पितृभ्य इदं॥ ततो वपार्थं पिंड
त्रेधा विभज्य उपस्तरणाभिघारणवर्जमौदुंबर्या दर्व्या जुहोति। सोमाय पितृमते शुष्मिणे जुहुमो हविः। वाजिं
[illegible] निं दं जुषस्व नः स्वजा हव्यं देवेभ्यः पितृभ्यः स्वधा नमः स्वाहा। सोमाय पितृमत इदं॥ अंगिरस्वंतमूतये
यमं पितृमंतमाहुवे॥ वैवस्वतेदमाद्धि नः स्वजा हव्यं देवेभ्यः पितृभ्यः स्वधा नमः स्वाहा। यमायांगि
रस्वते पितृमत इदं॥ यदग्ने कव्यवाहन पितॄन्यक्ष्यृतावृधः। प्र देवेभ्यो वह हव्यं पितृभ्यश्च स्वजा हव्यं देवेभ्यः
पितृभ्यः स्वधा नमः स्वाहा॥ अग्नये कव्यवाहनायेदं॥ इति पिंडत्रयं हुत्वा तूष्णीं दर्वीं मध्ये निधाय ततः पिंडान्

त्रिषु

कृत्वा द्वितीयस्योदकुंभस्यार्धेन पूर्वरेखायां तेषु कुशेषु त्रसं मार्जयित्वा पिंडानुपस्तीर्णाभिघारितो ददाति ॥ एतत्ते
ततामुकशर्मन्ये च त्वामनु यांश्च त्वमत्रान्वस्यैषा ते तत स्वधाक्षितिर्यावती पृथिवी तावती ते मात्रा तावतीं तए
तां मात्रां भूतां ददामि पृथिव्यक्षितमसि पित्रायमाक्षेष्ठा इति प्रथमं पिंडं दद्यात् ॥ एतत्ते पितामहामुकशर्मन्ये च
त्वामनु यांश्च त्वमत्रान्वस्यैषा ते पितामह स्वधाक्षितिर्यावदंतरिक्षं तावती ते मात्रा तावतीं तए तां मात्रां
भूतां ददाम्यंतरिक्षेणाक्षितमसि पितामहायमाक्षेष्ठा इति द्वितीयं पिंडं ददाति ॥ एतत्ते प्रपितामहामुक
शर्मन्ये च त्वामनु यांश्च त्वमत्रान्वस्यैषा ते प्रपितामह स्वधाक्षितिर्यावती द्यौस्तावती ते मात्रा ता ताव
तीं तए तां मात्रां भूतां ददामि दिव्याक्षितमसि प्रपितामहायमाक्षेष्ठा इति तृतीयपिंडं ददाति ॥ द्वितीयस्यो
दकुंभस्य शेषेण कुशेषु पूर्ववन्मार्जनं कुर्यात् ॥ अत्र पितरो यथाभागं मंदध्वं ॥ इति तत्तो योदकुंभजलं तं उत्था ११
डुलक्षालनं जलेनालोड्य भूमौ पिंडसमीपे वा ह्येत् ॥ पानिरक्षा ः स्वस्ट भागानि ये चापि पिंजरो
हरंतां विहरंतां तृप्यंतु रुद्धि [illegible] रक्षयंते येनः पतिता गर्भी अस्त्रं भाजउपासते ॥ तेभ्यः स्वजा स्वधा नमः

धि

स्तृण्वंतु मदंतु च॥ये आमा ये च पक्का ये च दग्धाः पतंतिन॥तेभ्यः स्वजाः स्वधानमः स्तृण्वंतु मदंतु च॥ये कुमाराया॥ पु
स्त्रियो याश्च विज्ञाताः पतंतिनः॥तेभ्यः स्वजाः स्वधानमः स्तृण्वंतु मदंतु चेति॥ततः पिंडसमीपमागत्याअंजनं ददा
ति॥आंजंतां पितरः आंजंतां पितामहा आंजंतां प्रपितामहा इति॥अभ्यंजनं ददाति॥अभ्यंजंतां पितरः अभ्यंजंतां
पितामहा अभ्यंजंतां प्रपितामहा इति॥अथ वासांसि ददाति॥एतानि वः पितरो वासांसि एतानि वः पितामहा वा
सांसि एतानि वः प्रपितामहा वासांसीति त्रीणि सूत्राणि छिंद्दाति॥अथ षड्भिर्नमस्कारैर्विपर्यासमुप ता
तिष्ठते॥नमो वः पितरो रसाय पितरो नमो वो य एतस्मिंल्लोके स्थ युष्मां स्ते नु ये स्मिंल्लोके मां ते नु य एत
स्मिंल्लोके स्थ यूयं तेषां वसिष्ठा भूयास्त ये स्मिंल्लोके हं तेषां वसिष्ठो भूयासं॥नमो वः पितरः शुष्माय॰नमो
वः पितरो जीवाय॰नमो वः पितरः स्वधायै॰नमो वः पितरो मन्यवे॰नमो वः पितरो घोराय पितरो नमो वो य एतस्मिं
॰भूयासं॥अनुषज्योपतिष्ठते॥अथ पुत्रं याचते वीरं मे पितरो दत्त पितृमान् हं युष्माभिर्भूयासं सुप्रजसो
मया यूयं भूयास्त॥वीरं मे पितामहा दत्त पितृमान् हं युष्माभिर्भूयासं सुप्रजसो मया यूयं भूयास्त॥वीरं मे
प्रपितामहा दत्त पितृमान् हं युष्माभिर्भूयासं सुप्रजसो मया यूयं भूयास्त॥अथैतान् पितॄन् स्वस्थानं नयन्मन

अथैतान्पितॄन्स्वधां नयन्मनसा तान् अनुगच्छति ॥ यं तु पितरो यथा लोकं मनसा जवेन ॥ २

सानुगच्छति । उत्तिष्ठत पितरः प्रेत शूरा यमस्य पन्थामनु याता पुराणं ॥ धत्तादस्मासु द्रविणं यच्च भद्रं प्रणो ब्रूताद्भागधां
र: देवतासु । प्रवाहयेसुरेत पितरः सोम्या गंभीरैः पथिभिः पूर्व्यैः । अथा पितॄन्त्सुविदत्राँ अपीत यमेन ये सधमादं मदंती
तीति । अथ पितॄननुगतामनन्मनस्वती भिस्तिस्रभिर्गिभिराह्वयति । मनो न्वाहुवामहे नाराशंसेन स्तोमेन पि
तॄणां च मन्मभिः । आ न एतु मनः पुनः क्रत्वे दक्षाय जीवसे । ज्योक् च सूर्यं दृशे । पुनर्नः पितरो मनो ददातु दैव्यो जनः ।
जीवं व्रातं सचेमहीति । अथ यजमानस्य परिहितमहतं वासो गां पितृयज्ञ वेदे ब्राह्मणाय दत्वान्यत्परिस्नाणाहं वा
सः परिधाय चम्यदक्षिणां दिशं गत्वा चतुर्थनोदकुंभेन स्नायात् ॥ यासु गंधारसा वर्णा बलं च निहितं तु पये । ताम्
आपः शिवा संतु दुष्कृतं प्रवहंतु मे । या तु जनमभिषिंचंति देवप्रोषिता महीं ॥ ताम्यो आसं निष्क्रमणे सर्वमिदं जायते जग
त् । ताम् आपः शिवाः संतु । यासामिमे त्रयो लोकास्तेजसा यशसावृताः । ताम् । मे याः प्राचीरेवती मधुमतीराप
स्रवंति शुक्राः । ताम् । या दक्षिणा रेवती मधु । ताम् । याः प्रतीचीरेवतीर्म । ताम् । या उदीची रेवती । मे । या तु ध्रुवरि
वती । मे । एवं मार्जनं कृत्वाचम्य तदपि वासः संपरित्यज्याऽसौ निर्मितं वासः क्षौमं वासः परिधायाचम्य प्राजापत्यं पर्वा १२
य ज्ञोपवीत्यग्नेः समीपमुपगच्छति प्राजापत्येन तदेवं णां । पूर्ववद्दृष्ट्यपक्वकृतं तु ल्लुकमग्नौ क्षिपति । अभ्युद्धृतो हविषे जा
तवेदा अवाड् हव्यानि सुरभीणि कृत्वा । प्रादाः पितृभ्यः स्वधया ते अक्षन्प्रजानन्नग्ने पुनरप्येहि देवानीति । ब्राह्मणो

प्र

भ्यः। पिंडान्नो दत्तं च ददाति। अथ यजमानोध्वर्युर्वा। स्वि। न्नेवाग्नौ जयानभ्यातानान्राष्ट्रभृतो मा ल होमांश्च जुहोति। चित्तं च स्वा
हा। चित्तायेदं। चित्तिश्च स्वाहा। चित्त्यायइदं। अकूतं च स्वाहा। अकूतायेदं। आकूतिश्च स्वाहा। आकूत्याइ॰ विज्ञातं च
स्वाहा। विज्ञातायेदं। विज्ञानं च स्वाहा। विज्ञानायेदं। मनश्च स्वाहा। मनसइदं। शाक्करीश्च स्वाहा। शाक्करीभ्यइदं। दर्शश्च
स्वाहा। दर्शायेदं। पूर्णमासश्च स्वाहा। पूर्णमासायेदं। बृहच्च स्वाहा। बृहतइदं। रथंतरं च स्वाहा। रथंतरायेदं। प्रजा
पतिर्जयानिंद्राय वृष्णे प्रायच्छदुग्रः पृतनाज्येषु। तस्मै विशः समनमंत सर्वाः स उग्रः स हि हव्यो बभूव स्वाहा। प्र
जापतयइदं॥ १३॥ इति जयाः॥ अग्निर्भूतानामधिपतिः स मावत्वस्मिन्ब्रह्मन्नस्मिन्क्षत्रेस्यामाशिष्यस्यां पुरोधा
यामस्मिन्कर्मन्नस्यां देवहूत्या२ स्वाहा। अग्नये भूतानामधिपतय॰ इंद्रो ज्येष्ठानामधिपतिः॰ इंद्राय ज्येष्ठानामधि
पतयइदं॰। यमः पृथिव्या अधिपतिः॰ यमाय पृथिव्या अधिपतयइदं। वायुरंतरिक्षस्याधिपतिः॰ वायवेंतरिक्षाधि
पतयेदं॰। सूर्यो दिवोधिपतिः। सूर्याय दिवोधिपतयेदं॥ चंद्रमा नक्षत्राणाम॰। चंद्रमसे नक्षत्राणामधिपतये॰
णो बृहस्पतिर्ब्रह्मणोधिपतिः॰ बृहस्पतये ब्रह्मणोधिपतये॰। मित्रः सत्यानामधिपतिः॰ मित्राय सत्यानामधिप
तयेदं। वरुणोपामधिपः॰ वरुणायापामधिपतयेदं। समुद्रः स्रोत्यानामधिपतिः॰ समुद्राय स्रोत्यानामधिपतये।
अन्नं२ साम्राज्यानामधिपति तन्मावतु॰। अन्नाय साम्राज्यानामधिपतिनइदं॰। सोम ओषधीनामधिपतिः। सोमा

ओषधीनामधिपतयइदं।सविताप्रसवानामधिपतिः॰सवित्रेप्रसवानामधिपतयेइदं।रुद्रःपशूनामधिपतिः॰रुद्रायपशूना
मधिपतये॰॥अपउपस्पृश्य॥त्वष्टारूपाणामधिपतिः॰त्वष्ट्रेरूपाणामधिपत॰।विष्णुःपर्वतानामधि॰।विष्णवेपर्वता
नामधि॰।मरुतोगणानामधिपतयस्तेमावंतु॰।मरुद्भ्योगणानामधिपति॰।यजमानकर्तृकेध्वर्युःप्रतिहोमंसमुदत्तां
तेवायजमानंवाचयेत्।पितरःपितामहाःपरेवरेततास्ततामहाइहमावत॥अस्मिन्ब्रह्मन्नस्मिन्क्षत्रे॰।अध्वर्युकर्तृ
केनयजमानवाचनं।इत्सम्पातानाः।ऋताषाडृतधामाग्निर्गंधर्वःसइदंब्रह्मक्षत्रंपातुतस्मैस्वाहा॥ऋतसाहऋतधा
म्नेग्नयेगंधर्वायेदं।तस्यौषधयोप्सरसऊर्जोनामताइदंब्रह्मक्षत्रंपांतुताभ्यःस्वाहा।ओषधीभ्योप्सरोभ्यऊर्ग्भ्यइदं॰॥सं
हितोविश्वसामासूर्योगंधर्वःस॰सत्संहितायविश्वसाम्नेसूर्यायगंधर्वायेदं॰।तस्यमरीचयोप्सरसआयुवोनामता॰
मरीचिभ्योप्सरोभ्यआयुभ्य॰।सुषुम्नःसूर्यरश्मिश्चंद्रमागंधर्वः॰सुषुम्नायसूर्यरश्मयेचंद्रमसेगंधर्वायेदं॥त
स्यनक्षत्रा[illegible]ण्यप्सरसोबेकुरयोनामता॰।नक्षत्रेभ्योप्सरोभ्योबेकुरिभ्य॰।भुज्यःसुपर्णोयज्ञोगंधर्वःस॰भुज्य
वेसुपर्णायज्ञायगंधर्वायेदं॰।तस्यदक्षिणाअप्सरसस्तवानाम॰दक्षिणाभ्योप्सरोभ्यस्तवाभ्यइदं॥प्रजापति ९३
र्विश्वकर्मामनोगंधर्वः।प्रजापतयेविश्वकर्मणेमनसेगंधर्वाये॰तस्यऋक्सामान्यप्सरसोवह्नयोनाम॰ऋक्सामे
भ्योप्सरोभ्योवह्निभ्य॰॥इषिरोविश्वव्यचावातोगंधर्वः॰इषिरायविश्वव्यचसेवातायगंधर्वायेदं॰।तस्यापोप्सरसो

मुदानामता इ॰ पातु ता॰ । अद्भ्योप्सरोभ्यो मुदाभ्य इ॰ ॥ भुवनस्य पते यस्य त उपरि गृहा इह च । स नो रास्वाज्यानिꣳ राय
स्पोषꣳ सुवीर्यꣳ संवत्सरीणाꣳ स्वस्तिꣳ स्वाहा ॥ भुवनस्य पत्य इदं॰ । परमेष्ठ्यधिपतिर्मृत्युर्गंधर्वः॰ । परमेष्ठिनेधि
पतये मृत्यवे गंधर्वायेदं॰ । तस्य विश्वमप्सरसो भुवो नाम ता॰ विश्वस्मा अप्सरोभ्यो भूभ्य इ॰ सुक्षितिः सुभूतिर्भद्रकृत्सुवर्वा
न्पर्जन्यो गंधर्वः॰ सुक्षितये सुभूतये भद्रकृते सुवर्वते पर्जन्याय गंधर्वायेदं॰ तस्या विद्युतोप्सरसो रुचो नाम ता॰ विद्युद्भ्यो
प्सरोभ्यो रुग्भ्य इदं॰ । दूरेहेतिरमृडयो मृत्युर्गंधर्वः स॰ । दूरेहेतये मृडयाय मृत्यवे गंधर्वायेदं॰ ॥ तस्य प्रजा अप्स
रसो भीरुवो नाम ता॰ प्रजाभ्योप्सरोभ्यो भीरुभ्य इदं॰ । चारुः कृपणकाशी कामो गंधर्वः स॰ । चारवे कृपणकाशि
ने कामाय गंधर्वाये॰ ॥ तस्याधयोप्सरसः शोचयंतीर्नाम ता॰ आधिभ्योप्सरोभ्यः शोचयंतीभ्य इ॰ स नो भुवनस्य
पते यस्य त उपरि गृहा इह च । उरु ब्रह्मणेस्मै क्षत्राय महि शर्म यच्छ स्वाहा॰ । भुवनस्य पत्य इ॰ इति राष्ट्रभृतः । अ प
छिद्र कांडे उकारः । कूष्मांड होमे अरण्ये केल कारः । यद्देवा देवहेडनं देवासश्चकृमा वयं । आदित्यास्तस्मान्मा
मुंचत ऋतस्यर्तेन मामुत स्वाहा ॥ देवेभ्य आदित्येभ्य इ॰ देवा जीवनकाम्या यद्वाचानृतमूदिम । अग्निर्मा तस्मादे
नसो गार्हपत्यः प्रमुंचतु दुरिता यानि चकृम करोतु मामनेनसꣳ स्वाहा ॥ अग्नये गार्हपत्यायेदं ॥ ऋतेन द्यावा
पृथिवी ऋतेन त्वꣳ सरस्वति । ऋतान्मा मुंचतांꣳहसो यदन्यकृतमारिम स्वाहा ॥ द्यावापृथिवीभ्याꣳ सरस्व

स्पाइदं०॥सजातशंसादुतवाजामिशंसाज्ज्यायसः शंसादुतवाकनीयसः।अनाज्ञातंदेवकृतंयदेनस्तस्मा
त्वमस्माज्जातवेदोमुमुग्धिस्वाहा॥जातवेदसइ० यद्वाचायन्मनसाबाहुभ्यामूरुभ्यामष्ठीवद्भ्यांशिश्नैर्यद
नृतंचकृमावयं।अग्निर्मातस्मादेनसःस्वाहा।अग्नयेगार्हपत्यायेदं।यद्धस्ताभ्यांचकरकिल्बिषाण्यक्षाणांवग्नुमु
पजिघ्नमानः।दूरेपश्याचराष्ट्रभृच्चतान्यप्सरसावनुदत्तामृणानिस्वाहा॥दूरेपश्याराष्ट्रभृद्भ्यामप्सरोभ्या
मिदं०अदीव्यन्नृणंयदहंचकारयद्वादास्यन्संजगाराजनेभ्यः।अग्निर्मा०सस्वाहा।अग्नयेगार्हपत्या
येदं।यन्मयिमातागर्भेसत्येनश्चकारयत्पिता।अग्निर्मा०अग्नयेगार्हपत्यायेदं।यदापिपेषमातरंपि
तरंपुत्रःप्रमुदितोधयन्।अहिंसितौपितरौमयातत्तदग्नेअनृणोभवामिस्वाहा।अग्नये० यदंतरि
क्षंपृथिवीमुतद्यांयन्मातरंपितरंपितरंवाजिहिंसिमा।अग्निर्मातस्मा०अग्नयेगार्हपत्याये०यदाशसा १४
निःशसायत्पराशसायदेनश्चकृमानूतनंयत्पुराणं।अग्निर्मा०अग्नयेदं०।अतिक्रामामिदुरितंयदेनोज
हामिरिप्रंपरमेसधस्थे॥यत्रयंतिसुकृतोनापिदुष्कृतस्तमारोहामिसुकृतान्नुलोकंस्वाहा।अग्नये०।त्रि
तेदेवाअमृजततदेनस्त्रितएतन्मनुष्येषुमामृजे॥ततोमायदिकिंचिदानशेअग्निर्मा०अग्नयेगार्हपत्यायेदं।

दिविजाताअप्सुजाताताया जाताओषधीभ्यः। अथोयाअग्निजाआपस्तानःशुंधंतुशुंधनीःस्वाहा। अद्भ्यःशुंधनी
भ्यइदं। यदापोनक्तंदुरितंचरामयद्वादिवानूतनंयत्पुराणं॥ हिरण्यवर्णास्ततउत्पुनीतनस्वाहा। अद्भ्योहिरण्यव
र्णीभ्यइदं। इमंमे० वरुणायेदं। तत्त्वायामि० वरुणायेदं। त्वन्नोअग्ने०। अग्निवरु०। सत्वन्नो० अग्निवरु०। इमंमेअ
यास्य०। अग्नयेअयसे०॥ इत्यसमात्स्नहोमः।८ तदादर्शपूर्णमासोक्तवद्दंपतीअग्नीयातां। अथाधिवृक्षसूर्येतिल
माषव्रीहियवाःप्रियंगवोणवोगोधूमाःकुलिशावासप्तमाइतिग्राम्याः श्यामाकानीवाराअरण्यतिलाःग
र र्त्तिल्मागवीधुकःधुकःगार्मुतावेण्युयवाःकुर्वीदाःसप्तमाइतिआरण्याश्चेतिसमुच्चित्यप्रक्षालितंसर्वौष
धमाज्यस्थालींस्रुवांबर्हिवासोदीप्यांछलाकोनीत्यादायवाससासंप्रछन्नाःपत्नीयजमानाध्वर्युब्रह्मा
णोयदासूर्यकिरणाभूमिंमुक्ताधिगतवृक्षभवंतितदोपासनमंबरीषंवोत्तपनीयंवाभिप्रव्रजंतिऔपास
नस्याधीधानपक्षेतंद्वेधाविभज्यार्धमवशिष्टेसर्वाधानपक्षेसर्वंभिन्त्वाश्रोत्रियागाराद्वाहृतेवाग्निंदर्भ
संयोज्जितेवाकपालाग्नौवादीप्यांछकलान्प्रक्षिप्यपरिस्तीर्याज्यंसंस्कृत्यतेनसहसर्वौषधमप्याधिश्रित्यो
भयंपर्यग्निकृत्वेत्याद्द्वयंसंस्कृत्याअध्वर्युर्यजमानोवांजलौउपस्तीर्यसर्वौषधमोप्याभिघार्यजुहोति

अग्नये सर्वौषधाय पुष्ट्यै प्रजननाय स्वाहा ॥ अग्नये सर्वौषधाय पुष्ट्यै प्रजननायेदं । ततोध्वर्युः स्रुस्मिन्नेवाग्नौ जया
नभ्यातानांश्च राष्ट्रभृतो मास्य होमां जुहोति । अथ स्रुचि चतुर्गृहीतं गृहीत्वा समिधमाधाय पर्युक्ष्य प्राजापत्यां जुहोति ।
प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परिता बभूव । यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणां
स्वाहा ॥ प्रजापतय इदं । अपरं चतुर्गृहीतं गृहीत्वानुख्यां जुहोति । अन्वग्निरुषसामग्रमख्यदन्वहानि प्रथमो
जातवेदाः । अनु सूर्यस्य पुरुत्रा च रश्मीननु द्यावापृथिवी आततान स्वाहा ॥ अग्नये जातवेदस इदं ॥ अथैतानंगारा
न्सतेवाग्न्या रावेवाय जमानो गृह्णाति । आयुषे वो गृह्णामि तेजसे वो गृह्णामि तपसे वो गृह्णामि वीर्याय वो गृह्णामि ब्र
ह्मवर्चसाय वो गृह्णामीति अथैतानादायोपतिष्ठति । आयुर्मा मा विव्रातु भूतिर्मा विव्रातु ब्रह्मवर्चसं मा मा वि मा
व्रातुरिति ॥ तामध्वर्युर्वे संप्रदायो शयंति । अन्वारब्धे यजमाने यथागतमागत्य गार्हपत्यायतने न्युप्य समा
धाय बर्हिषा परिस्तीर्योत्तरतः पात्राण्यासादयति । आज्यस्थाली चरुस्थालीं मेक्षणं चोद्धरणपात्रीं प्रोक्षणीं १५
स्रुवं च निर्वपणस्थालीं आनडुहं चर्म मुसलोलूखले शूर्पं पवित्रे याम्यश्च समिधस्त्रिस्त्रश्च । अग्नेर्दक्षिणतो ब्र
ह्मा यजमान उपविशतः । अध्वर्युः पवित्रं कृत्वा प्रोक्षणीं संस्कृत्य तानि पात्राणि प्रोक्ष्याग्नेः पश्चाद्व्रीहि

मं चर्मानडुहं प्राचीनग्रीवमुत्तरलोमोपस्तीर्य तत्पवित्रेण निर्वपपात्रेण तस्य दक्षे ग्रीवायां वा चतुरः पात्राणां व्री
हीणां निर्वपति। ब्रह्मणे जुष्टं निर्वपामीति तूष्णीं वा प्रतिपात्रं मंत्रावृत्तिः॥ अथ निरुप्तानामभिमन्त्रणमा
कूत्यै त्वा कामाय त्वा समृधे त्वेति व्रीहीनग्ने निरुप्य प्रोक्षति ब्रह्मणे जुष्टं प्रोक्षामीति तूष्णीं वा॥ चर्माभ्युक्ष्य
निरस्यति॥ ततः कृष्णाजिने आनडुहे चर्मणि वा उलूखलं निधाय व्रीहीनोप्य मुसलेनावहन्ति त्रिः फली
कुर्यात् त्रिः प्रक्षाल्य निर्वपपात्रेण स्थाल्यां तिरः पवित्रं कृत्वा वा त्वायुदपात्राण्यानीय स्थालीमग्नावधिश्रि
त्य तस्यां तिरः पवित्रं शूर्पेण तंडुलानोप्याज्यं निरूप्याधिश्रित्याभिपर्यग्निकृत्स [illegible] स्रुवौ मेक्षणं च स
मृज्य चरुमभिघार्येदं च मुद्वासयति॥ अथैनमायती काल इत्यर्थः। गवामागमनकाले ऋत्विग्भ्यः प
रिकर्मणः प्राक्॥ [illegible]तो ब्रह्मौदन इति॥ अध्वर्युरियः सर्वैर्मह ऋत्विग्भिः सहागम्योत्तरतोनुदिशामुपवि
शंति यजमानः॥ उत्तरपार्श्वीमुपस्तीर्य ब्रह्मौदनस्थालीमचालयन्निव तस्या [illegible]स्यौदनमध्ये ग
र्तं कृत्वा तस्मिन्नभ्रतमाज्यमानीय मेक्षणेनोपत्यज्जुहोति॥ एवेधसे कुयये मे ध्याय वसोर्वं दारुक्षभा ह
पुवसे। यतो भयमभयं तन्नो अस्तु व देवा नय जेह अग्ने स्वाहा॥ ब्रह्मण इदं॥ अथैतान ध्वर्यादीनु

नरतः परस्पराभिमुखमुपविश्य मानुषेणाचमस्योधरण्या ज्यामभिसंस्पृशन्कर्षति ब्रह्मौदनं तेषां मध्ये
प्रवेशयति ॥ यज्ञोमेपनमत्विति त्रिरुक्ती वा ॥ नमो दनं पृथक्पात्रेषु चतुर्धाकृत्वा तेभ्यः पृथग्रजपो हीमि ॥
तेमध्याश्नास्व त्रयं प्राशय्य यजमानं प्रश्नासंति ॥ राध्यस्त ब्रह्मौदनइति ॥ तेभ्यः सो उंव त्सतरं ददाति ॥ तेभु
क्त्वावम्यनं प्रतिगृह्णंति ॥ रुद्रायगामिति उत्तरतः आसीनः कश्चिद्ब्राह्मणः क्षाम कोषमभाति वरुरुष्
ष्यां संल्व्र यमोदनेन तस्मै यजमानाय किंचिद्ददाति यजमानः ॥ पात्र्यामवशिष्टे आसिक्त प्रभृताज्यस्य
षेसंस्कृस्याज्यत्रेषमुद्धरण्या ज्यामुर्वरिताज्येति स्त्रश्चित्रियाश्वत्थसमिधोभ्याज्यादधाति ॥ समि
धाग्निं दुवस्यत घृतैर्बोधयतातिथिं ॥ आस्मिन्हव्याजुहोतन स्वाहा ॥ अग्नयइदं ॥ उपत्वाग्ने हविष्मती
र्घृताचीर्यंतु हर्यत ॥ जुषस्व समिधोमम स्वाहा ॥ अग्नयइदं ॥ तंत्वासमिद्भिरंगिरो घृतेन वर्धयाम
सि ॥ बृहच्छोचायविष्ठ्यः स्वाहा ॥ अग्नयइदं ॥ यजमानः समित्स्वाहितास्त्वध्वर्यवे वत्सतरीं ददाति ॥
रुद्रायगां ॥ अथास्मै यजमानाय अध्वर्युररणी प्रयच्छन्नाह ॥ वाचंयमो भविष्यसि स्तप्रं शायियन्ते
संरक्षिष्यामी ॥ सपरिकर्मिणः प्राह ॥ ब्राह्मणा नाशयतान्वं गोयत्तसं भारानिधत्तेति ॥ अनुसस्मनंतर

वाग्विसर्गः॥अध्वर्युररणी प्रतिगृह्य न यजमानो जपती। मही विश्पत्नी सदने ऋतस्यार्वाची एतं धरुणे रयी
णां॥अंतर्वत्नी जन्यं जातवेदसमध्वराणां जनयथः पुरोगां॥आरोहतं दशतं शक्वरीर्मम ऋतेनाग्न आयुषा व
र्चसा सह।ज्योग्जीवंत उत्तरामुत्तरां समां दर्शमहं पूर्णमासं यज्ञं यथा यजा इति॥अरणी उरसि श्लेषय
ति॥ऋतस्थि यवती स्थो अग्निरेतसौ गर्भं दधाथां ते वामहं ददे॥सत्यं पद्वीरं विभृथो वीरं जनयिष्यथः तत्
तेभ्यः प्रातः प्रजनिष्येथे ते मा प्रजाते प्रजनयिष्यथः॥प्रजया पशुभिर्ब्रह्मवर्चसेन स्वर्गे लोके इति॥अध्व सु
र्युर्यजमानेन अनृतपरित्यागसत्याभिवादनरूपं संकल्पं कारयति। मानुषात्कार्याद्दैवमेव
कार्यं कारयति। यजमानो जपति। इदमहमनृतात्सत्यमुपैमि। मानुषाद्दैव्यमुपैमि। दैवीं वाचं यच्छामि
इति परिकर्मिणः तं वाचंयमं रात्रीं जागरयंत आसते॥यजमानः शल्कैस्ताः रात्रिमग्निमुपसमिंधे॥श
ल्कै रग्निमिंधान उभौ लोकौ सनेमहं उभयोर्लोकयोर्ऋध्वाति मृत्युं तराम्यहं॥प्रतिकाष्ठं मंत्रावृत्तिः
न एकमंत्रेण बहूनि वा इति अध्वर्युर्गार्हपत्यस्यान्तरतो बध्येन कल्माषेणाजेनाधास्यमानं यजमानं प्र
तिदर्शयति॥प्रजा अग्ने संवासय आशाश्च पशुभिः सह। राष्ट्राण्यस्मा आधेहि यान्यासंत्सवितुः
सवे सति॥वाचंयमा द्वयेत दंतमपरात्रे वा॥अरणीप्रदानोद्येतदंतमपरात्र इति केचित्॥अरणीदानो

पश्लेषवर्जंपूर्वरात्रइत्यन्येअथाध्वर्युरपररात्रआगत्ययजमानहस्ताद्दक्षिणेनोत्तरारणिंसव्येनाधरारणिं
गृहीत्वानिष्पमति।जातवेदोभुवनस्यरेतइहसिंचतपसोयज्जनिष्यते।अग्निमश्वत्थादधिहव्यवाहंशमीग
र्भाज्जनयन्मयोभूः।अयंतेयोनिर्ऋत्वि०यायतोजातोअरोचथाः।तंजानन्नग्नआरोहाथानोवर्धयारयिं।
इति।यजमानस्यस्वत्रारवीयोपिमंत्रः।अयंतेयो।नि०गिरः।।समारोपणंक्लो।किकीभूतमग्निमुदस्यगार्हप
त्यस्यायतनंशकृत्पिंडेनपरिलेपयति।।अपेतवीतविचसर्पतातोयेत्रस्थपुराणायेचनूतनाः।।अदादिदं
यमोवसानंपृथिव्याअक्रन्निमंपितरोलोकमस्मैइतिएवमन्वाहार्यपचनाहवनीययोः।तुष्णींवापरिले
पनं।अथसपत्नीकेनयजमानेनसमिदाधानंतामन्वारब्धोगार्हपत्यस्यायतनेसंभाराणांत्रेतानीयंभाग
मादायनिर्वपति।यत्पृथिव्याअनामृतंसंबभूवत्वेसचा।तदग्निरग्नयेददात्तस्मिन्नाधीयतामयं।आ
धीयमानेषुयदाउषान्य[illegible]द्रयति।नदाजपति।।यददश्चंद्रमसिकृष्णंतदपीहेति।चंद्रमसिमनसा १७
कृष्णंध्यायेत्।तान्संभारानग्नित्वेनावधारयति।।स्पृष्ट्वाजपतीवा।दिवस्त्वावीर्येणपृथिव्यैमहिम्ना।
अंतरिक्षस्यपोषेणसर्वपशुमादधेति।तानभिमंत्रयति।संवःसृजामिहृदयानिसंसृष्टंमनोअस्तुवः।
संसृष्टःप्राणोअस्तुवः।संयावःप्रियास्तन्वःसंप्रियाहृदयानिवः।आत्मावोअस्तुसंप्रियःसंप्रिया

स्तनुवोममेति।नान्तसमीकरोति।कल्पेतांद्यावापृथिवीकल्पंतामाप ओषधीः।कल्पंतामग्नयःपृथङ्ममज्यै
ष्ठ्यायसव्रताः।येग्नयःसमनसोंतराद्यावापृथिवीवासंतिकारत्।अग्निकल्पमानाइंद्रमिवदेवाअभि
संविशंत्विति।संभाराणांद्वितीयमादायान्वाहार्यपचनेनिर्वपति।यदंतरिक्षस्यानामतनुवःसं बभ्रुवत्ते
सखा।तद्वसुरग्नयेददात्तस्मिन्नाधीयतामयं।समीकरणांतंपूर्ववत्।अतिशिष्टान्संभारानाहवनी
येनिर्वपति।यद्दिवोनाम्नः·सखा।तदादित्योग्नये·मयं।समीकरणांतंपूर्ववत्।अपगोप्तारंपरिकर्मि
णंरक्षायैसमादिशति।परिकर्म्मिन्नग्नीन्रक्षस्व।सआह।विहृताअग्नयोमाकश्चनांतरेणसंचारीदिति।
अध्वर्युःप्रदक्षिणमावृत्यप्रत्यङ्ङ्गार्हपत्यस्यायतनेउपरिसंभारेषुपश्चात्कृष्णाजिनंवामुंजकु
लायंनिधायतस्योपरिप्रागायतामुदगायतांवाधरारणिंअभिधायतस्याःपश्चिमदेशेमंथनार्थमु
त्तरारणिशंकुंनिदधाति।चित्तिस्रुक्।चित्तमाज्यं।वाग्वेदिः।आधीतंबर्हिः।केतोअग्निः।विज्ञातमग्निः।
वाक्पतिर्होता।मनउपवक्ता।प्राणोहविः।सामाध्वर्युः।वाचस्पतेविधेनामन्।विधेमतेनाम।विधेस्त्व
मस्माकंनाम।वाचस्पतिःसोमंपिबतु।अस्मासुनृम्णंधात्स्वाहेति।यजमानादीन्ब्रूयान्मंथतेति।
यजमानःप्रथमोमंथति।यजमानउत्तमः।प्रत्यवयेहजातवेदपुनस्त्वंदेवेभ्योहव्यंवहनःप्रजानन्त्वाप्र

गांपुष्टिंरयिमस्मासुधेह्यथाभवद्यजमानायशंयोः। अभ्युत्सन्नो अध्वर्योवरं तेददामीति वा वरं विसृजेत्। यज
मानोध्वर्युणासह जातं अग्निंउपतिष्ठते। अजीजनन्नमृतं मर्त्यासो स्रेमाणं तरणिं वीडुजंभं। दश स्वसारो
अग्रुवः समीचीः पुमांसं जातमभिसंरभंतां। इति। अग्नेरुपरिनासिकाभ्यां वायुंनिष्क्रामति। प्रजापतेस्त्वा
प्राणेनाभिप्राणिमिपूष्णः पोषेण मह्यं। दीर्घायुत्वाय शतशारदाय। शतं शरद्भ्य आयुषे वर्चसे। जीवातवे
पुण्याय। प्राणे त्वामृतमादधामि। अन्नादमन्नाद्याय गोप्तारं गुप्त्यै इति। अध्वर्युर्जातमग्निमायतनेनिदध
दाह। ब्रह्मन् छंदांस्यनु ब्रूहीति। ब्रह्मा त्रिर्हिंकुर्याद्व्याहृतीर्वा ब्रूयात्। अध्वर्युर्निहितमग्निंस्पृष्ट्वा जपति।
गार्हपत्यत्वेनावधारयतीवा। पश्चान्मंथनपक्षे प्रांचमुद्धृत्यादधातिवा। भूर्भुवो घर्मः शिरः स्वदयमग्निः
संप्रियः पशुभिर्भुवत्। छर्दिस्तोकाय तनयाय यच्छ। भृगूणां त्वाव्रतपते व्रतेनादधामि भार्गववोगायत्रेण
छंदसेति। भृगूणां भूर्भुवः इत्युपक्रम्य अंगिरसां त्वाव्रत०। धाम्यांगिरसो गायत्रे०। सेत्यंगिरसां। भूर्भुवस्त्वनु
द्रुत्यादित्यानां त्वाव्र०। धामि। पाराशरेगाय० सेतिपराशराणां। एवमन्येषां गोत्राणामादित्यानां भृग्वंगिरो १८
वर्गद्वयव्यतिरिक्तगोत्रेणाय त्रेण छंदसेत्यादि यथायजमानगोत्रोच्चारणमित्यादि यथागोत्रं। काश्यपो
गायत्रेणेत्यादि निर्दिश्यते। अस्यावृत्तरभागे प्रावदसौवर्णं शाकलं निदधाति। स्वयातनुवास्तंभवेति राजतं वा
कलं वृषलाय मरत्वीय ब्राह्मणाय वो यजमान एव प्रयच्छति। यजमानोध्वर्युश्च गार्हपत्यमुपतिष्ठेते। अहंत्वदस्मिन

दसि त्वमेतन्ममासि योनिस्तव योनिरस्मि। ममैव सन्वह हव्यान्यग्ने पुत्रः पित्रे लोककृज्जातवेदः। सुगार्हपत्यो
विदहन्नरातीः उषसः श्रेयसीः श्रेयसीर्दधत्। अग्ने सपत्नाँ अपबाधमानो रायस्पोषमिषमूर्जमस्मासु धेहि
ति गार्हपत्यादेकदेशं गृहीत्वान्वाहार्यपचनमादधाति। भूर्भुवो वातः प्राणस्तदयमग्निः स प्रियः पशुभिर्भुवत्।
स्वदितं तोकाय तनयाय पितुं पच। अमीषां त्वेति पथामृषिः छंदसेति। उत्तरतो हिरण्यशकलमुपास्यति। स्वयात
नुवा संभवेति रजतं पर्यवत्य प्रदायाग्निमुपतिष्ठते। इमा उ मामुपतिष्ठंतु रायः आभिः प्रजाभिरिह संवसेय। इहो
दतिष्ठतु विश्वरूपी मध्येवसोर्दीदिहि जातवेदः इति। अथापसव्यमागत्य गार्हपत्ये आहवनीयप्रणयनार्थं तथे
ध्ममादधाति। यथाशोद्दितेस्सूर्ये आहवनीयः प्रणयनयोग्यो भवति। उपयमनं गार्हपत्यसमीपे स्थापयति॥
अश्वं वा अनड्वाहं वा अजं वाविं वा। कमंडलुं वा। गार्हपत्यस्य पुरस्तात्संनिधापयति। अथ प्रणयनीयमिध्मम
भ्युद्धरणपात्रेऽउद्धरं नाह। ब्रह्मन्नपःछंदां॰स्यनुब्रूहीति ब्रह्मणा व्याहृतिं जपन्नुक्त्वा सुप्रिवर्हिं कृते यजमानान्वा
रब्धोध्वर्युस्तमादीप्तमग्निं पात्रे निधायोपयमनेनोपयम्य जानुदघ्नमुद्यच्छते। ओजसे बलाय त्वोद्यच्छे वृष
णे शुष्माय आयुषे वर्चसे। सपत्नतूरसि वृत्रतूर्यस्ते देवेषु मा ह्मा सुवर्गीयस्तआ त्वा पशुषु प्रविष्टः पुरीष्योनिम
पुष्येषु पंक्तये नयानो अग्ने जुषमाण एहि दिवः पृथिव्याः पर्यंतरिक्षाद्वातात्पशुभ्यो अध्योषधीभ्यः। यत्रयत्र

जातवेदः संबभूथ स नो नो अग्ने जुषमाणाए हीति ॥ गार्हपत्यादाहवनीययोर्मध्ये त्रेधा विभज्य प्रथमं भागं गछं नयतो नी
य-मानमश्वादीनामन्यतममनुमंत्रयते । प्राचीमनु प्रदिशं प्रेहि विद्वानग्नेरग्ने पुरो अग्निर्भवेह । विश्वा आशा दीद्यानो वि
भाहि ऊर्जं नो धेहि द्विपदे चतुष्पदे इति । ततोग्निनाभिदघ्नमुद्धृत्य द्वितीयं भागं गत्वोपरमति विक्रमस्व महाँ असि
वेदिषन्मानुषेभ्यः । त्रिषु लोकेषु जागृहीति ततो ग्रीवादघ्नमुद्धृत्य तृतीयं भागं गछति ॥ अन्वग्निरुषसा॰ ततो ने
ति । अथाग्निमन्यहस्ते प्रदाय प्राङ्मुख स्वस्याश्वादीनामन्यतमस्य दक्षिणेन पूर्वपादेन संभाराणामुत्तरदेशमा
क्रमय्याश्वं प्रदक्षिणमावर्त्याग्निरभुस्योदं वमु त्सृजति ॥ स एषो ध्वर्युर्भवति । यजमानो न्यमश्वं ब्रह्मणे ददा
ति । अथार्धोदिते सूर्ये ध्वर्युः प्रदक्षिणमावृत्य प्रत्यङ्मुख स्वस्तिष्ठन्नग्निं संभारेष्वश्वादीनामन्यतमपदे प्रतिष्ठा
पयति । यदिदं दिवो यददः पृथिव्याः संविदाने रोदसी संबभूवतुः । तयोः पृष्ठे सीदतु जातवेदाः शंभूः प्रजाभ्यः
स्तनुवे स्योनः । प्राणं त्वामृत आदधाम्यन्नादमन्नाद्यायागोप्तारं गुप्त्यै इति ॥ अथ संप्रैषमाह ॥ ब्रह्मछं
दाँ स्यनुब्रूहीति ॥ ब्रह्माग्निर्ही कुर्याद्व्याहृतिर्वा ब्रूयात् । अध्वर्युर्निहितमग्निं स्पृष्ट्वा जपत्याहवनीयत्वे १९
नावधारयति वा । भूर्भुवः सुवरर्केश्चक्षुस्तद सौ सूर्यस्त्वद्यमग्निः संप्रियः पशुभिर्भुवत् । यत्ते शुक्रस्य शुक्रं व
र्चः शुक्रा तनूः शुक्रं ज्योतिरजस्रं । तेन मे दीदिहि तेन त्वादधे अग्निनाग्ने ब्रह्मणा । अमीषां त्वेति यथागोत्रं ॥ प

जतत्राकल्पप्रदानां नसमानं। आहवनीयमुपतिष्ठते। भानन्दो व्यानन्दो सर्वमायुर्व्यानन्दो। सर्वोदितेब्रह्मवर्च
सकामस्याहवनीयमाधानं। संभारेषुप्रतिष्ठापनमुपस्थानं चाध्वर्युरेवमेवेतिकेचित्। आहवनीयमेव
न्वावसथ्यौकल्पयति। रथचक्रं प्रवर्त्तयति। सततंगार्हपत्यादाहवनीयात्। ततोग्नीन्परिसमुह्यपर्युक्ष्य
परिस्तीर्य यजमानोध्वर्युर्वासर्वेष्वग्निषु अंजलिनासर्वौषधंजुहोति। भूर्भुवस्सुवःस्वाहा। व्याहृतिभिः स्वा
हाकारांताभिः अध्वर्युराज्यंस्रूक्सततएकैकस्मिन्नग्नौ पंचपंचनानावृक्षीयाः समिधोभ्यज्यादधाति।
समिध्यमानःप्रथमोनुधर्मःसमक्तुभिरज्यते विश्ववारः। शोचिष्केशोघृतनिर्णिक्पावकःसुयज्ञोअग्नि
र्यजथायदेवान्स्वाहेत्याश्वत्थी। सर्वत्राग्नयइति याजमानं। घृतप्रतीकोघृतयोनिरग्निर्घृतैःसमिद्धोघृत
मस्यान्नं। घृतप्रुषस्त्वासरितोवहन्ति घृतंपिबंत्सुयजायक्षिदेवान्स्वाहेत्यौदुंबरी। त्वामग्नेसमिधानं
यविष्ठदेवादूतंचक्रिरेहव्यवाहं। उरुज्रयसंघृतयोनिमाहुतंत्वेषंचक्षुर्दधिरेचोदयन्वतिस्वाहेति।
पालाशी। त्वामग्नेप्रदिवआहुतंघृतेनसुम्नायवःसुषमिधासमीधिरे। सवावृधानओषधीभिरुक्षि
तपुरुज्रयांसिपार्थिवावितिष्ठसेस्वाहेति शामीमयी। घृतप्रतीकंवऋतस्यधूर्षदं। मग्निंमित्रंनसमिधा
नंऋंजते। इंधानोअक्रोविदथेषुदीद्यच्छुक्रवर्णामुदुनोयंसतेधियंस्वाहेतिवैकंकती।। एवमन्वाहार्य

पचनाहवनीययोः संभारनिर्वपनादि समिदाधानांतं यजमानोन्वारंभेत्। ततः प्रदक्षिणमावृत्य गार्हपत्यस्य
पश्चात्तिष्ठन्यजमानः सपत्नीकस्तन्वभिरुपतिष्ठते। येते अग्ने शिवे तनुवौ विराट् च स्वराट् च। तेमावि
शतांते मा जिन्वतां। येते अग्ने शिवे तनुवौ। संम्राट् चाभिभूश्च। तेमावि॰ तां। येते॰ विभूश्च परिभूश्च
तेमावि॰ तां। येते॰ प्रभ्वी च प्रभ्वतिश्च। तेमा॰ तां। यास्ते अग्ने शिवास्तनुवस्ताभिस्त्वादधे इति। एव
मन्वाहार्यपचनाहवनीययोः। एवं द्वेष्यं मनसाध्यायन्। यास्ते अग्ने घोरास्तनुवस्ताभिः पाप्मानं गच्छ।
योस्मान्द्वेष्टि यं च वयं द्विष्मः। न स्वाग्नि घोरास्तनूरनुदिशति। यास्ते अग्ने घोरास्तनुवः। क्षुच्च तृष्णा
च। अस्नुक्चानाहुतिश्च। अशनया च पिपासा च। सेदिश्चामतिश्च। एतास्ते अग्ने घोरास्तनुवस्ताभिः
पाप्मानं गच्छ योस्मान्द्वेष्टि यं च वयं द्विष्मः। अपउपस्पृश्य। निम्रुक्च निर्हितिश्च अभिर्हितिश्च। उद्धाव
२ शीतारश्च। उग्राच भीमाश्च। सदाम्नी सेदिर्निरा। एतास्ते अग्ने घोरा॰। ष्णुदति यास्ते अग्ने घोरा॰ भस्र २०
सेतेनैव यजुषा वा घोरास्तनूरभिव्रयस्याप्रत्येकमनुदिशति। अपउपस्पृश्य। जघनेन गार्ह
पत्यमेव तिष्ठन् विराजं क्रमेरूपातिष्ठते। नर्य प्रजां मे गोपाय। अमृतत्वाय जीवसे। जातां जनिष्य

माणां च । अमृतं ते सत्ये प्रतिष्ठितामिति गार्हपत्यं । अथर्व पितुं मे गोपाय । रसमन्नमिहायुषे । अदब्धायोऽशी
ततनो । अविषं नः पितुं कृणु । इत्यन्वाहार्यपचनं । शंस्य पशून्मे गोपाय । द्विपादो ये चतुष्पदः । अष्टाश
फाश्च य इहाग्ने । ये चैव कत्राफा आशुगाः । इत्याहवनीयं । सप्रथ सभां मे गोपाय । ये च सभ्याः सभासदः ।
तानिंद्रियावतः कुरु । सर्वमायुरुपासतामिति सभ्यं । अहे बुध्निय मंत्रं मे गोपाय । यमृषयस्त्रैविदा वि
दुः । ऋचः सामानि यजूंषि । सा हि श्रीरमृता सतामित्यावसथ्यं । एतदंत अनुक्ता विशेषं सर्वत्र ह याज
मानं । ततोऽध्वर्युः स्मार्त्तवदाज्यं संस्कृत्य चतुर्गृहीतं गृहीत्वाहवनीये समिधमाधाय । द्विः परिषिच्य
परितोऽग्नेः परिस्तीर्णेवाति छन्नासीनो वा पूर्णाहुतिं जुहोति । सप्त ते अग्ने समिधः सप्त जिह्वाः सप्त ऋष
यः सप्त धाम प्रियाणि । सप्त होत्राः सप्तधा त्वा यजंति सप्त योनीः आ पृणस्व घृतेन स्वाहा ॥ सप्तव
ते अग्नय इदं । यजमानः पूर्णाहुतौ वरं ददाति । अध्वर्युः पुनराज्यं संस्कृत्य तेनैव वाज्येन स्रुवेण कूष्मांडै
र्जुहुयात् । यद्देवा यद दी र्घमायुषे विश्वतः इति त्रिभिरनुवाकैः प्रत्यवं हुत्वा यजमानेन वैश्वानरायेत्यु
पस्थानसमिदाधाने कृते वरे दत्ते अग्निसंस्कारमग्निहोत्रहोममाज्येन कुर्यात् । पूर्णाहुत्यंतमन्वाधेयमा
श्वलायनहोमकरणपक्षे अग्निसंस्कारकः सायं प्रातर्होमो सायं होमतंत्रेण समस्य कुर्यात् पूर्णाहुत्यपि

होत्रहोमयो विकल्पः समुच्चयोवा।जघनेनगार्हपत्यमुपविश्य प्राणानायम्य सायंतनहोमे प्रातरग्निहोत्रं हो
ष्यामीतिसंकल्प्य स्फ्य त्वाउत्पत्ति क्रमेणाग्नीन्परिस्तीर्य उत्तरेणगार्हपत्यं कूर्चे प्रक्षाल्याग्निहोत्रपात्राणि द्वंद्वं न्यंचि ग्नी
सादयति।आज्यस्थालीं स्रुवमग्निहोत्रहवणीमभिद्योतनं समिधं कूर्चमिति।कूर्चे आज्यस्थाल्यामाज्यमा
नीयजघनेनगार्हपत्यमुपसाद्याग्नीन्क्रमेण परिषिंचति ऋतं त्वा सत्येन परिषिंचामीति गार्हपत्यं।एवमन्वा
हार्यपचनाहवनीयौगार्हपत्यादुदीचोंगारान्निरूह्याज्यमधिश्रित्याभिद्योतनकुशेनाभिद्योतयति अग्निस्ते
तेजोमाप्रतिधाक्षीदिति आज्ये द्वे दर्भाग्रे प्रक्षिप्याभिमंत्रयति अमृतमसीति।पुनरभिद्योत्य त्रिःपर्यग्निक
रोति अंतरितं रक्षो अंतरिता अरातय इति [illegible] आज्यस्थालीमुदगुद्वास्यांगारान्प्रत्यूह्य
दक्षिणेन स्रुवं समिधं च सव्येनाग्निहोत्रहवणीं युगपदादत्ते।देवस्य॰।माददइति।।गार्हपत्ये प्रति
तपति।। प्रत्युष्टं रक्षः प्रत्युष्टा अरातय इति। कूर्चेग्निहोत्रहवणीं निधाय यजमानमनुमंत्रयते।ओं २१
मुन्नेष्यामीति स प्रतिवक्ति ओंमुन्नयेति।।अध्वर्युरग्निहोत्रहवण्यां स्रुवेण चतुरुन्नयति भूरिडा
भुवरिडा स्वरिडा भूर्भुवः स्वरिडेति प्रतिमंत्रं एवमेवाहुतिद्वयं चतुर्गृहीतं गृहीत्वा स्थाल्यां स्रुवं प्रस

अध्वर्युः स्रुवं सकृज्ज्वालोपरि प्राङ्नीत्वा कूर्चे निधाय प्रदक्षिणमावृत्य गार्हपत्यं प्रतीक्षते॥ उपप्रेत संगच्छध्वं माभा
गिनो भागधेयं प्रियामि॥ वषट्कृताहुतीनां स्रुक्कृतां यत्र लोकास्तत्रेमं यज्ञं यजमानं च धत्तेति हुतीयामाहुतिं प्रत्यभि
क्यास्रुवाप्रत्वां हुतिमति क्रम्य समिधः पूर्वभागे समिधः पूर्वाहुतेबहुतरद्वयां जुहोति प्रजापतये स्वाहेति
प्रजापतय इदं॥ स्रुवमग्नेरुपरि त्रिर्नीत्वाति वाल्यकूर्चे निधायोपस्पृश्य निर्ऋतिर्देवि रसि रक्ष्मे पाप्मानमे
ति॥ स्रुगग्रमारभ्य प्रत्यगंगुलिना धोमुखेन कृतेना आबिलमवसृज्य स्रुवउत्तरतः कूर्चेतादृत्नेनव
पाणिनावमार्ष्टि ओषधीभ्यः स्त्वौषधीर्जिन्वेति प्राङ्मुखेनोत्तानेन पाणिना स्रुचो बिलमारभ्याग्रमुन्मृ
ज्य स्रुचयउत्तरतः प्रथमास्समाजन्वत्॥ कूर्चे लेपमवमार्ष्टि पितृभ्यस्त्वापितॄन्जिन्वेति। पुनरपि तथैवा
वमार्ष्टि। पितृभ्यस्त्वापितॄन्जिन्वेति। यजमानः प्राचीनावीति पितृभ्य इदमिति ब्रूयात्। अपउपस्पृश्या २२
अध्वर्युस्तद्द्रुतशेषं द्विः प्राश्नाति प्रजाभ्यो तिरिति। आचम्यैवं द्वितीयं आचम्यापसव्यउदङ्मुख आच
म्य स्रुग्गतं द्रव्यं हस्ते कृत्वा भक्षयाति। इदं हविः प्रजननं मे अस्तु दशवीरं सर्वगणं स्वस्तये॥ आत्म
सनि प्रजासनि पशुसनि अभयसनि लोकसनि वृष्टिसनि॥ अग्निः प्रजां बहुलां मे करोत्वन्नं पयो रे
कूर्चेतादृत्नेनैव पाणिनावमार्ष्टि। ओषधीभ्यस्त्वौषधीर्जिन्वेति [illegible] स्रुचो [illegible] दक्षिणतः

तो अस्मासु धत्त। रायस्पोषमिषमूर्जमस्मासु दीधरत्स्वाहेति। स्रुवं निर्णिज्याहवनीये निष्टप्याद्भिः परयित्वा हव
नीयस्योत्तरतः किंचिन्निनयति॥ ॥ सप्तऋषीन्प्रीणीहि समुद्रबिन्दुं च। सप्तऋषिभ्यः स्वाहेति। सप्त
ऋषिभ्य इदं। गार्हपत्यस्य पश्चात् किंचिन्निनयति इदमहमग्नौ वैश्वानरे ममतं जुहोमि स्वाहेति। अ
ग्नये वैश्वानरायेदं। अंतर्वेदि किंचिन्निनयति। आक्षित्याम क्षितिं हुतिं जुहोमि स्वाहेति। आक्षित्यार ता
इदं। पत्नीयजमानयोर्हस्ते स्रुक्स्रुवजलशेषमुन्नयति। स्रुवं कूर्चे निधाय। ग्निष्टुत्क्रमेण शाकल्यान् प्रक्षि
प्य प्रज्वाल्य पूर्ववत्परिषिंचति। ऋतं २ सत्यं त्वा सत्येन त्वेन परिषिंचामि तिडपछाने विकल्प्यः॥ अथ
पावमानेष्टिः। तन्त्राश्वलायनसूत्रे तिस्र इष्टय उक्ताः। बोधायनसूत्रानुसारिणां एके इष्टिपक्षे विशेषः।
यजमानो गार्हपत्यस्य पश्चादुपविश्य याः पुरस्तादित्यादित्तनुहविर्भिर्यक्ष्य इति त्रिरूपांशु त्रिरुच्चै
रुक्ता तन्नहविषि संबंधि हविरग्निषोमा वाज्यभागदेवते उपांश्वग्नये अष्टाकपालः पुरोडाशोग्नये
पवमानायाष्टा। अग्नये पावकायाष्टाकपालः पुरोडाशोग्नये शुचयेष्टा। ऐन्द्राग्न एकादशकपा
लः पुरोडाशो द्विः स्यैघ्रेत वरुदेवा आज्यपत्स्वाहि अग्न्यन्वाधानादि व्रतसमिदाधानांतं प्रकृति

वत्॥ पौर्णमासतंत्रं॥ इध्मसंनहनेन तत्स्वांत्रयो विंशतिधा। हस्तसंमार्जनादि विधाया। पात्रासादने त्रि
यत्वारिंशत्कपालैः सह चरुस्थालीमेक्षणेन सह चरुमेक्षणं। प्रणीताप्रणयनेन सह घृतप्रणयनपात्रं।
ब्रह्मोपवेशनादि प्रणयने अपः प्रणीय ब्रह्मन् घृतं प्रणेष्यामीत्युक्त्वा तथैव घृतं प्रणयेत्॥ अनया घृतं प्रणया
मी॥ निर्वापे अग्नये जुष्टं निर्वपामी। देवस्य त्वा॰ भ्यामग्नये पवमानाय जुष्टं॰। अग्नये पावकाय जुष्टं। अग्न
ये शुचये जुष्टं। इंद्राग्निभ्यां जुष्टं। अदित्यै जुष्टं। पामी। सादियथादेवतं॰ समानं कर्माधिवपनात्पूर्वं॥ प्रोक्ष
णे॥ देवस्य त्वा॰ भ्यामग्नये वो जुष्टं प्रोक्षाम्यग्नये पवमानायाग्नये पावकायाग्नये शुचय इंद्राग्निभ्यामदित्यै॥ यागं
अग्नये वो जुष्टं प्रोक्षामी। यागानुषंगेणैव अधिवपन संवपनयोः। अधिवपनात्प्राक् सर्वान् विभज्य अ
दित्यै वत्सस्य मन्त्रेत्॥ अधिवपने देव॰ आसंवपनात्समानं॥ आग्नेय ष्ट संवपा॰ कपालोपधाने श
पष्ठावाग्नेयादिवत् उष्ट्यार्थमुपधायैंद्राग्नार्थमेकादश कपालान् उपधायादेवयजनं वहेत्यंगारमधिव
र्त्यति रः पवित्रमानीय प्रणीता घृतं चरुस्थालीं कृत्वासि पृथिवी॰ इत्यधिश्रित्य दंग्धीमीति प्रदक्षिण २२
मंगारैः परिस्तेनुयात्॥ यदि तु श्रुतप्रायएव वर्ज्यमानाधिष्य भवति न दास प्रणीतोदकमेवाधिश्रये
त्॥ संवापो यि वपनवत् यथादेवतं पुरोडाशमधिश्रित्यादिस स्थाल्या घृमर्हस्त्विस्वायुष इति तिरः पविंत्
गप्रनिधम य। स्रुचि प्रागग्रां समिधं निधायाज्यहूयं संमृशति॥ सजूर्देवैः सायंप्रातर्याविभिः सायं प्रातर्याव्णोमा
देवाः स्वस्ति संपारयंतु पशुभिरिति॥ समिधास्त हाग्नि होत्र हवणीमादायोपाकरणकूर्चमथः कृत्वान्यं तद् य
र्वैस्त्यत्कः जघनेन गार्हपत्यमुदगग्रउपसादनीय कूर्चे सादयति नमः ईशाना य प्रजाः पशवो मे वर्धतामहं यजमा
नो मा रिषयामिति॥ दशहोतारं व्याख्यायोपाहरणीय कूर्चेन सहादाय प्राणसंमितमाहवनीयसकाशंगछ
ति॥ भूर्भुवस्सुवरुर्वंतरिक्षमन्विद्युय पंथा वितनोदेवयानो येनायं नृपयः स्वर्गकामास्तेन गछामिपरमेव्यो
मन्॥ यथान हीषियः स्रुक् ताः सका शाक्तिजघने। नाहवनीयं वेद्यां प्रागग्रेउपसादनीयकूर्चे सादयति नमः
ईशानाय प्रजाः पशवो मे वर्धतामहं यजमानो मा रिषामिति समिधमाहवनीयमध्येभ्यादधाति रजतहरिणी
सप्त सूर्यज्योतिषं वायुमतीः स्वर्ग्या स्वर्गाय लोकाय राज्ञी महर्षि तिभिषक्कामुपदधेमत्तं प्राणा पाने
दधामि प्रजापतिस्त्वा सादयतु समिधं स्पृष्ट्वा जपति॥ तया देवतयांगिरस्वद् ध्रुवासीद॥ ता अस्य सूददोह
सः सोमं श्रीणंति पृश्नयः। जन्मन्देवानां विशः त्रिष्वारोचने दिव इति अपउपस्पृश्येति॥ विधुर्दासि विधे
मे पाप्मानमिति॥ समिधमादीसायामग्निस्त्वयो ध्यात्वा तत्पूर्वी प्रथमाहुतिं जुहोति॰ अग्नि सूर्याभ्यामिदं॥

तंडुलानोप्याज्यनिर्वापः ऐंद्राग्नपुरोडाशश्रपणानंतरं चरुमुद्दिश्याग्ने हव्यं रक्षस्वेति उदके चरुश्रपणपक्षे
श्रितत्राय चरावाज्यमानीयोद्वासनकाले यथादेवतं हवींषि अभिघार्यान्तर्वेद्यासादयतीत्यादि प्रधानानु
मंत्रेण होमं अग्निर्वृत्राणि॰ प्रधाने अग्नमहि इत्युपांशु अनु ब्रूहि इत्युच्चैरित्यादि सर्वत्रानुवाक्यास्य॰ वौषडि
त्युच्चैरेवं सर्वत्राग्न आयूंषि अग्ने पवस्व॰ स नः पावको अग्ने पावकरो॰ अग्निः शुचि॰ उदग्ने॰ चतुर्णामन्ना
या दः॥ इंद्राग्नियोरिंद्राग्नी अवत्साद॥ अदित्याः अहं देवयज्यया हसो मुञ्चेयमिति॥ अन्वाहार्यमासाद्या
ग्न्याधेयदक्षिणां ददाति। प्रजापतेर्भागो॰। ऋत्विजः अयं व ओदनः अग्नीदिदं तउपबर्हणं ब्रह्मन्नयं ते अश्व
ति वह्निरुक्मश्वं होतरेषा ते धेनुरिति धेनुं॥ अध्वर्यो एष तेनड्वानिति गोमध्ये स्थितमनड्वाहम्ऋत्विजः उद्गातर एष
स्रो तेहिरण्यवासः हिरण्यं वा त्रिमुक्तो नुपमनेषयो न चरेत्तम्बमानं॥ पुरुषा कमेतेमिथुनौ गावो वासांसि गावश्चे पंच
ध्वं तियथानिर्दिष्टं प्रतिगृह्य पूर्णाते वसत्तदशा कृत्वा पान्यस्य प्रतिगृह्णीयुः उपबर्हणं स्थाने ब्रह्मणेनड्वाहं।
ण सर्वत्र ब्रह्मण एवेति वा। देवस्य त्वेत्यनुद्रुत्य सर्वस्यैकमेव वा प्रतिगृह्णीयुः सर्वासां दक्षिणानामनुक्रमेण। दा
एवमोदनव्यतिरिक्ता उपबर्हणा वासः सहितास्तद्व्यतिरि[illegible]क्ता वा पंचभिः सप्तभिर्वा गोभिः सहि
ता द्वादश द्वादश दक्षिणा भवंति॥ एतासां दक्षिणानामभावे द्वादश वासांसि तावतो मंथानो दद्यान्नैको गां वा
४ आग्नीध्रः। देवस्य त्वा सवि... दक्षिणे ब्रह्मण्या ओदनं ब्रह्मणे उपबर्हणं ब्रह्मणे मिथुनौ गावो सोमा ४
४ यवासो रुद्राय गां ते रमतस मश्रुपा वयो राजभ्य ... इदं। एवमध्वर्युः

३ नित्यप्रणयनपक्षां तादे

२४ दद्यात्। उद्धारपक्षे न तत्सहिता आग्नीध्रवर्जितास्राग्नीयुः तदभावे आग्नीध्रसहिताः यथाद्रव्यं प्रतिगृह्णः। ततआ
दिसंचरुं व्युद्धस्य चत्वार आर्षेयाः प्राश्नीयुः यथादेवतसुज्जितीवा वचनं। ब्राह्मणतर्पणांतं समानं। ततो यावज्जी
वमग्न्यत्रयोजस्रास्युर्द्वादशाहं प्रणयनपक्षे वोद्धाम पूर्वाधाने यदि द्वादशाहांतः पौर्णमास्यापत्तीत तदा न द्वाद
शाहाजस्रधारणं। सोमपूर्वेष्टिपूर्वे च। न द्वादशाहाजस्रधारणं किंतु पावमानेष्ट्यंते दाक्षिणात्याश्च परि
काद्यस्य ज्यार्था याग गार्हपत्यात्तौ प्रणयेत्। द्वादशाहाजस्रधारणपक्षे यावदजस्रधारणं व्रतचर्यं
तमिति केचित्। सावेवं। नानृतं वदेत्। नमन्त्रयेन पिबेत्। मांसं लवणं तिलव्यतिरिक्तं कोशीधान्यं नाश्नी
यात्। न स्त्रियमुपेयात्। भस्मसारादिनावासः प्रत्यूत्क्लनं न कुर्यात्। नम्र्द्र्वायो छिष्टं दद्यात्। स्वयमेव पा
त्रे प्रक्षालयेत्। स्वयमेव समिधा आहृत्य स्वाध्यादध्यात्। अस्य गृहे नभ्न ब्राह्मणो न वसेत्। अग्निहोत्रोच्छे
त षणव्रतएववा यजमानो भवेदुक्तमेव पत्न्यश्नीयादिति। ॥अथाग्निहोत्रहोमः॥ ॥तत्रन्नूतनाग्निहो २४
त्रारंभे विशेषः। सोत्र न लिख्यते। अतोवहिर्लिख्यते। अस्तमयात्पूर्वं स्नानपवनमंत्राचमनमंत्रप्रो
क्षणपुण्याहानि कुर्यात्। पुण्याहदेवता अग्निः सूर्यप्रजापतयः॥ गार्हपत्यस्य पश्चादुपविश्य पत्न्यास
ह दर्भेषूपविश्य मयाः पुरस्तादिसाहितत्पितासत्यधिकारे यावज्जीवमग्निहोत्रं होष्यामीति संकल्पयेत्॥

४ पावमानेष्टिः।

यतनमुपविशेत्।। उद्धरणानंतरमाहोमासन्नौ यजमानोव्रतचारिणौपवेशने यजमानस्यांकधारणासदा।
दक्षिणेनपाणिना दक्षिणाग्निंगार्हपत्यमाहवनीयं वेशान्यादिभिस्त्रिः परिसमुह्य पुनः पुनरुदकमादाय
तथैवपर्युक्षति।। ऋतसत्याभ्यां त्वा पर्युक्षामीति सायं सत्यऋताभ्यां त्वामीति प्रातः प्रति पर्युक्षण मंत्रः।
गार्हपत्यादविछिन्नामुदकधारां हरेत्। तंतुंतन्वन्निति आहवनीयाद्गार्हपत्यस्य पश्चादुपविश्योदकं गारान
पोहरेत्। सुहुतकृतस्थ सुहुतं करिष्यथेति तेषु होमद्रव्यम धिश्रयति अधिश्रितमधिश्रितं हिं इति
ज्वलतातृणेनाधिश्रितमवज्वलयति अग्निष्टे तेजोमाहार्षीदिति तथैव तृणं पृथक् निधायपयोदोहोन
क्षालनोदकपूर्णस्रुवेणाधिश्रितं सिंचति। शांतिरस्यमृतमसीति पयोव्यतिरिक्तद्रव्यहोमे अन्येनोदके
न सेकः घृतहोमे दर्भाग्रद्वय प्रक्षेपः। तेनैव ज्वलता तृणेन। त्रिः पर्यग्निकरोति अंतरि [illegible] तं रक्षो अंतरिता
अरातयइति सकृन्मंत्रेणाद्विस्तूष्णीं स्रुक्स्रुकं परिस्यज्य होमद्रव्यं मदग्साउदगुद्वास्यमंत्रेयथोधस्त २५
निदध्यात् स्तोकसहितं कर्षनिवोदगाधः अश्रयति।। दिवेत्वा अंतरिक्षायत्वा पृथिव्यैत्वेति उर्ध्वे मध्ये
पृथिव्यामीति प्रथमेनोपरिष्टात्तीयेन तदध आकाशेत्तृतीयेन भूमौ निदध्यात्।। तिस्रोमंत्राः संपादयेत्।

पृथक्कृतानंगारान् गार्हपत्ये प्रत्यूहति। सुहुतकृतस्थ सुहुतमकार्ष्टेति स्रुक्स्रुवौ गार्हपत्ये प्रतितपति। प्रत्यु
ष्टं रक्षः प्रत्युष्टा अरातयो निष्टप्तं रक्षो निष्टप्ता अरातयइति। अग्निहोत्रस्थाल्याउत्तरतः स्रुवमासाद्यास्रुव
हस्त एव ओमुन्नयानीत्यनुतिसर्जयीत सायं। ओमुन्नेष्यामीति प्रातः। स्रुचं स्रुक्स्थाल्यामेधंस्तणपयितापरे
णवेदिं परेणगार्हपत्यस्मुत्तरेणाग्निं गत्वा आहवनीयसमीपे दक्षिणात उदङ्मुख उपविश्य। ओमुन्नयेत्यनु
सृजेत्। सर्वत्र त्रिमात्रः प्रणवः अग्रेणाहवनीयमेत्य स्रुवि होमद्रव्यं पूर्णस्रुवेण चतुरुन्नयति भूरिडेत्येकं
भुवरिडेति द्वितीयं स्वरिडेति तृतीयं भूर्भुवः स्वरिडेति चतुर्थं पंचावत्तिनो तु तूष्णीं पंचमं स्थालीमभिमृश्य स्रुक्
पुष्करोपरि समिधं निधाय समिधं स्रुवं पुष्करे गृहीत्वा प्राणसंमितां गार्हपत्यस्य उपरिष्टादाहवनीयस
मीपे नाहत्वा हवनीयस्य पश्चात्प्राणसंमितां कृत्वा प्रागग्रेषु कुशेषु सादयित्वा दक्षिणं जान्वाच्य तां समि
धमाहवनीये अभ्यादध्यात्। रजतां त्वाग्निज्योतिषं रात्रिमिष्टकामुपदधे स्वाहेति सायं। हरिणीं त्वा सूर्यज्यो
तिषमहरिष्टकामुपदधे स्वाहेति प्रातः। अग्नये ज्योतिष इदमिति सायं। सूर्याय ज्योतिष इदमिति प्रातस्त्या
गः। आहितां समिधमनुमंत्रयते। आधानमंत्रेण स्वाहाकारविनाकृतेन रजतां त्वाग्निज्योतिषं रात्रिमि
ष्टकामुपदधे। तथैव हरिणीं त्वा सू० तेन ऋषिणा तेन ब्रह्मणा तया देवतयांगिरस्वद्ध्रुवा सीदेति। विद्युदसि

विघमेपाप्मानमग्नोश्रत्रया। अपउपस्त्रचयदीतांसमिधंद्व्यंगुलमात्रेतथैवहोमद्रव्यमभिजुहुयात्। भूर्भु
वःस्वरोम् अग्निर्ज्योतिर्ज्योतिरग्निःस्वाहेतिसायं भूर्भुवःस्वरोंसूर्योज्योतिर्ज्योतिःसूर्यःस्वाहेतिप्रातःअग्नि
ज्योतिषइदमितिसायं। सूर्यज्योतिषइदमितिप्रातःस्त्यागः। अग्नयइदंसूर्यायेदमितिवा। स्रुवेषुकुशेषुनि
धायगार्हपत्यमवेक्षतेपश्चन्मेयच्छेति। आहुतिमनुमंत्रयतेनाअस्यसदृदोहसःसोमंश्रीणंतिपृश्नयः
जन्मंदेवानांविशस्त्रिष्वारोचनेदिवइतिपूर्वस्याहुतेरुत्तरस्तदधिकद्रव्यमसंसृष्टामुत्तरामाहुतींजु
होतितदाधिकेंस्रुच्येवत्रशेषयन्। प्रजापतयेस्वाहेतिमनसायचतुर्थ्यंतप्रजापतिपदंध्यात्वास्वाहेसुपा
भूत्वाप्रजापतयइदं। एतदंतंजान्वाच्यैवदेशातःकालातःसंनिहितोबधायै। तामाहुतींरुद्रास्सेणो(?)
ष्ठमाणोनुमंत्रयते। भूर्भुवःस्वःसुप्रजाःप्रजाभिःस्यांसुवीरोवीरैःसुपोषःपोषैः। उपत्वाग्नइतिअ
ग्निर्मूर्धेतिअग्निमीळइतिवाग्नेयीभिस्त्वा। एताभिः। अग्निहोत्रारंभदिनेसंवत्सरेचप्रतिसंवत्सरंअ
ग्नआयंषीतिनिस्त्रभिस्त्वस्त्रवमाहवनीयेत्रिरनुप्रकंप्यसव्येहस्तेकृत्वादक्षिणेनानुत्तानेनअधो २६
मुखेनदक्षिणपाणिनाग्रप्रभृतिमूलंयावत्। पुष्करमवमृज्यलेपंकुशलेमूलेषुतथैवनिमार्ष्टि।
पशुभ्यस्त्वेतिपशुभ्यइदं। प्रातरुत्तानेनपुष्करेकुशमूलेषुचपाणिनोन्मार्ष्टिकुशमूलानांदक्षिणतउत्ता

ततोअग्नीन्परिसमुह्यपर्युक्ष्यपरिस्तीर्यआज्यंगार्हपत्येस्मार्त्तेवतप्त्वास्रुचंस्रुक्स्रुवौनिष्टप्यस्रुक्विवतुर्गृहीतंगृ
हीत्वाहवनीयेसमिधमाधाययजमानोजुहोति। चित्तिंस्रुक्। चित्तं०आस्मासुनम्यं(?)धातस्वाहा। वाचस्पतयेब्र
ह्मणइदं। आहवनीयेएवकूष्मांडहोमः। यद्देवायददीव्यमायुष्टइतिपूर्ववत्। वैश्वानरायसुप्रजाणंवरः। अपराह्णे
अस्तमयात्पूर्वंआचम्यतीर्थेनप्रविश्यपश्चादुदगुपविश्यगार्हपत्यंप्रज्वल्यतस्मादेकेदग्निंदक्षिणाग्न्यायतनेस्थं
र्याभिमुखोनिदधाति॥ एवमाहवनीयं॥ सायमग्न्याग्न्यभिमुखंनिदधाति। पृथक्कुर्यादेकेकमुद्धरेत्। देवंत्वाद
वेभ्यःश्रियामुद्धरामीति। उद्धृतंप्राक्प्रणयति। उद्ध्रियमाणउद्धरपाप्मनोमायदविद्वान्यच्चविद्वांश्चकार। अ
ह्नायदेनःकृतमस्तिकिंचित्सर्वस्मान्मोदुद्धृतःपाहितस्मादितिसायं॥ प्रातस्त्वरात्र्यायदेनइति। प्रणीत
माहवनीयायतनेआदित्याभिमुखोनिदधाति। प्रातराहवनीयाभिमुखः। अमृताहुतिममृतायांजुहोम्य
ग्निंपृथिव्याममृतस्ययोनौ। तयानंतंकाममहंजयामिप्रजापतिःप्रथमोयंजिगायाग्नावग्निःस्वाहेतिअ
स्तमयोदयानंतरंआहवनीयाबर्हिराचम्यपाणिनातीर्थेनप्रविश्यगार्हपत्यस्यपश्चादुपविश्यप्राणाना
याम्यतिथ्यादिसंकीर्त्यअमुकद्रव्येणसायंप्रातरग्निहोत्रहोमौहोष्ये। तत्रेदानींसायमग्निहोत्रहोमंक
रिष्यइतिसंकल्प्यप्रातरितिप्रातःउद्धरणकालेहोमकालेचपत्नीविहाराद्बहिराचम्यतीर्थेनप्रविश्यस्वा

नाभ्यंगुली: कृत्वा प्राचीनावीती स्वधा: पितृभ्य इति पित्र्येणोदकं तत्र क्षिपेत् सिंच्य इदं । यज्ञोपवीती स्रुक् च कुशे
षु निधाय बर्हिरसि बर्हिषमे पाप्मानमप्सु प्रक्षा इत्यप उपस्पृश्य होतृ । स्रुग्धस्त एतदंतं कुर्यात् । गार्हपत्यस्य पश्चा
दुपविश्य जान्वाच्य नत्वाली चतुर्थं तं प्रजापतिपदं ध्यात्वा स्वाहेत्युपांशु पठन् । समिधमाधाय । होमद्रव्यं जु
होति । अग्नये गृहपतये स्वाहेति प्रथमां स्रुवाहुतिं जुहोति प्रजापतये स्वाहेति द्वितीयां दक्षिणाग्नौ समिध
माधाय अग्नये संवेशपतये स्वाहेति प्रथमां पूर्ववत् द्वितीयां । इं अग्नये गृहपतय इदं ॥ अग्नये संवेशपतय इदं ।
प्रजापतय इदमिति त्यागः । गार्हपत्यादुत्तरतः स्थित्वा । अभयं वो भयं मे स्त्वित्युक्त्वा । स्रुचं हस्ते गृहीत्वा विहारा
द्बहिर्भक्षयेदायुषे त्वा प्राश्नामीति प्रथमं । आचम्यां नाद्याय त्वा प्राश्नामीति द्वितीयं आचम्याभ्यामंगुल्या स्रुवं
निर्वेद्युत्तरांसेत्त्रिरुदकं निनयेत । सर्पदेवजनेभ्यः स्वाहेति त्रिः स्रुत्रेणाप्रागुदीच्यो निनयेत् प्रागुदीच्यो निनये
त् प्रागुदीच्योरिति द्विवचनात् स्राविद्ध उदीच्यद्भिर्निनयेत् । न तीर्थान्यां चतस्रोपि । अंतराल देवता बोधकस्य स
मासस्याभावादिति देवत्रातभाष्ये स्रुवं कुशैः प्रक्षाल्य कारिकायां अपराजितायां इशान्यां दिशि चत
स्रपिंडपितृयज्ञे अग्नौ मेक्षणमग्नादधाति ततः स्विष्टकृद्भाजनमिति वा ततस्ततस्र उदकपर्णाः स्रुवो नि

नयेत्। प्रतिनिनयनं मंत्रावृत्तिः। ऋतुभ्यः स्वाहेत्येकां दिग्भ्यः स्वाहेति द्वितीयां सप्तऋषिभ्यः स्वाहेति तृतीयां इत
रजनेभ्यः स्वाहेति चत्वारि। पंचमी आहवनीयस्य पश्चात् कुशदेशे पृथिव्याममृतं जुहोम्यग्नये वैश्वानराय स्वाहे
ति अग्नये वैश्वानरायेदं।। षष्ठी पश्चाद्गार्हपत्यस्य प्राणममृतं जुहोम्यमृतं प्राणे जुहोमि स्वाहेति अमृताय प्राणा
येदं। एतदंते गार्हपत्यदक्षिणाग्न्योः समिदाधानहोमौ। स्रुचमाहवनीये प्रताप्यांतर्वेदि निधाय यथा
लिंगं त्यागः। सर्वत्र न चसमिधो गृहीत्वाग्रेणाहवनीयं परीत्य आहवनीयस्य दक्षिणत उदङ्मुखस्तिष्ठन्।।
ति स्रः समिधोऽभ्यादधाति दीदिहि स्वाहेति प्रथमां द्वितीयेत्तृतीये तूष्णीं तथैव गत्वा एवं गार्हपत्ये दीदाय
स्वाहेति प्रथमां दक्षिणा तथाप्यस्य दक्षिणाग्नौ दीदयेति प्रथमां द्वे पूर्ववत् यथालिंगं त्यागः परिसमूह
ने पर्युक्षणे पूर्ववत् अर्चनं प्रदक्षिणा उपस्थानं नमस्काराः समर्पणं कर्मेणपात्रा। दधि तं डुलादीनां अधिश्र
यणाभावान्नोद्गं गारानपोहनादि अवज्वलनपर्यग्निकाद्येव।। ओदनपयोयवाग्वादीनां सर्वं। यदा २७
त्वन्यो जुहोति तदा यजमान इज्याभ्यामारभ्य परेण वेक्षिमित्यादि स्वायतन उपविश्याति सर्जनदु तानुमं
त्रणत्यागार्चनादि यथोक्तं कुर्यात्।। पर्वणि पयवाग्वा पयसो वा स्वयं जुहुयात् सायंप्रातर्होमयोरेकद्रव्य

होमे चावृत्ति र्वा पाणिसंमर्शनाद्यज्ञस्य संततिरिति स्फ्यास्तरणाद्यास्रुवं गार्हपत्ये स्मार्त्तवदाज्यं संस्कुर्यात् । स
वैवं । गार्हपत्यस्योत्तरतो दर्भानास्तीर्य तेषु आज्यस्थालीं स्रुवं चैव जुहूं च समिधं तथा । प्रोक्षणीं स्फ्यशाखे वपा
त्राण्येतानि सादयेत् । हूंहूं न्येषि पवित्रे प्रोक्षण्यां तिरः पवित्रमप आनीय त्रिरुत्पूय ताभिरुत्तानान्यन्यानि
पात्राणि प्रोक्ष्याज्यस्थाल्यां तिरः पवित्रमप आज्यमानीय गार्हपत्ये उदगंगारान्निरूह्य तेषाज्यमधिश्रि
त्याभियोतनकुशेनावज्वल्य तत्र दर्भाग्रद्वयं प्रोक्षितं प्रास्य तेनैव ज्वलता त्रिः पर्यग्निकृत्य कर्षन्निवोद
गुद्वास्यांगारान्प्रत्यूह्याज्यं पुनराहारं त्रिरुत्पूय पवित्रे अग्नौ प्रास्य स्रुक्स्रुचौ सकृत्संमृज्य निष्टप्य स
म्मृज्य प्रोक्ष्य गार्हपत्ये प्रतितप्य स्रुचि चतुर्गृहीतं गृहीत्वा उपरि समिधं निधाय स्रुचं स स्रुवामाज्यस्था
लीं च गृहीत्वाहवनीयसमीपे निदध्यादिति । आहवनीये तां समिधमाधाय पर्युक्ष्य चतुर्होतारं मनसा
नुद्रुत्याहवनीये जुहोत्यन्वारब्धे यजमाने । पृथिवी होता । द्यौरध्वर्युः । रुद्रोऽग्नीत् । बृहस्पतिरुपव २८
क्ता । वाचस्पते वाचो वीर्येण । संभृततमेनायक्ष्यसे । यजमानाय वार्यं । आसुवस्करस्मै । वाचस्पतिः सो
मं पिबति । जजनदिंद्रमिंद्रियाय स्वाहा । इस्तुद्वैः । वाचस्पतये ब्रह्मण इदं । पद्धवायदंदीव्यमायुषर्तीतित्रि

भिरनुवाकः कूष्मांडैर्होमः उपस्थानवरदानांतः अपरं चतुर्गृहीतं गृहीत्वा सारस्वतहोमौ जुहोति । पूर्णा पश्चादु
त पूर्णा पुरस्तादुन्मध्यतः पौर्णमासी जिगाय । तस्यां देवा अधिसंवसंत उत्तमे नाक इह मादयंतामग्नी
षोमौ प्रथमौ वीर्येण वसून्रुद्रानादित्यानिह जिन्वतं । माध्यं हि पौर्णमासं जुषेथां ब्रह्मणा वृद्धौ सुकृते
न साता वथास्मभ्यं सहवीरा रयिं नियच्छतं स्वाहा ॥ पूर्णमासायेदं । अपरं चतुर्गृहीतं गृहीत्वा जु
होति । निवेशनी संगमनी वसूनां विश्वारूपाणि वसून्यावेशयंती । सहस्रपोषं सुभगा रराणा सान
आगन्वर्चसा संविदाना यत्ते देवा अदधुर्भागधेयममावास्ये संवसंतो महित्वा । सा नो यज्ञं पिपृहि वि
श्ववारे रयिं नो धेहि सुभगे सुवीरं स्वाहा । अमावास्याया इदं । पाणिसंमर्शनादि पात्रासादनं एक
त्रिशत्कपालैः सह चरुस्थाली मेक्षणे । न सह चरुमेक्षणे निर्वपे देवस्य त्वा० भ्यामग्नाविष्णुभ्यां जुष्टं
निर्वपामि । सर्वं सरस्वत्यैः सरस्वते । अग्नये भगिने । प्रोक्षणे देवस्य त्वा० भ्यामग्नाविष्णुभ्यां वो जुष्टं प्रो
क्षामि सरस्वत्यै सरस्वते पूष्णे भगिने उ० करे तंडुलप्रक्षालननियनं । अधिवपनात्प्राक् सरस्वत्यै तंडु
लविभागं कृत्वा व्याख्यानमभिमृशति सरस्वत्यै वः । अधिवपने । देवस्य त्वेति । अग्नाविष्णुभ्यां जुष्टमधिव

पामिसरस्वत्यै सरस्वते ग्नये भागिने। कपालोपधाने अग्नाविष्णुभ्यामेकादशकपालान्युपधायादेवयजं वहे
त्यंगारमधिवर्त्सीतिरः पूर्वोक्रमानीतप्रणीतोदकं चरुस्थालीं क्रवासिप० हस्तयि श्रिसन्निदग्धमिति
मंत्रेण प्रदक्षिणमंगारैः परिश्रित्य सरस्वते द्वादशकपालान्युपधायाग्नये भागिने ष्टौ कपालान्युपदधाति।
सपवपः अधिवपनवत्। पिंडाभिमर्शने ग्नाविष्णुभ्यां त्वा सरस्वत्यै वश्चरव्यान। सरस्वते त्वा॥ ॥
अग्नये भगिने त्वा। दक्षिणपुरोडाशमधिश्रित्य चरुस्थाल्यां घर्मासीति श्रायुष इति तिरः पवित्रे तंडुला
नोप्येतरावधिश्रित्यान्यनिर्वापः दक्षिणं पुरोडाशं श्रपयित्वा चरुमुद्दिनपानेह व्यं रक्षस्वेत्युक्तोत्त
रो श्रपयति सर्वत्रैव स्रुक्संमार्जनान्युल्मुके निरस्यति स्वाहाकारेण मंत्रेण विकृतेष्टो स्रुवसंमार्जनानी
ध्मसंनहनानि चउल्मुकेएव निरस्यति उद्वासनादि यथा देवतं हवींष्यभिधारयति। स्वादि प्रधानानु
मंत्रणरग्नाविष्णोरहं देव० वीर्यवान्भूयासं सरस्वत्या अहं देवयज्यया वाचमन्नाद्यं पुषेयं। सरस्वतो २९
हं। प्रधामना भूयासं अग्नये भगिनोहं। यान्नादः। अन्वाहार्यमासाद्य मिथुनौ गावौ ददाति देवस्य त्वे
त्यादि ब्रह्मण ओदनं ब्रह्मणो मिथुनौ गावौ तैरम्यतत इध्मसंनहनानि स्रुक् प्रायश्चित्ताधानेस्रुवंमार्जनवत्।
प्रजापते भागोस्य्यूर्जस्वांतौ पयस्वांतौ प्राणापानौ मे पाहि समानव्यानौ मे पाहि उदानव्यानौ मे पाहि अक्षितोस्यक्षित्यै त्वा मामे क्षेष्ठा अमुत्र
मुष्मिन् लोके॥
मेक कर्तव्यं केवः॥ ॥इत्याश्वलायनाग्निहोत्रहोमः॥ ॥अथान्वारंभणीयेष्टिः॥ ॥ तपोर्णमास्यां पौर्णमासेन
समानोपवसथा कार्या। पूर्वेद्युर्नांदीमुखं राजाउदकशांति प्रतिसरबंधं च कृत्वाश्वो भूतेस्नानादि पंचकं कुर्या
त् पुण्याहे अस्मादयः श्रीयंतां याः पुरस्तादिस्यादि स्वर्गकामः सत्सधिकारे यावज्जीवं दर्शपूर्णमासाभ्यां यक्ष्ये।
इति त्रिरुपांशु त्रिरुच्चैरुक्त्वा। दर्शपूर्णमासावारप्स्यमानोन्वारंभणीयेष्ट्यायक्ष्ये इति त्रिरुपांशु त्रिरुच्चैरुक्त्वा।
गुरुभार्गवयोर्मौढ्ये ग्रहणेचंद्रसूर्ययोः। तथा मलिम्लुचे पौषे नान्वारंभणिमिष्यते॥ तथैव संकल्प्य प्रतिवच
नांते अन्वारंभणीया अग्नीषोमावाज्यभागौ आग्नावैष्णव एकादशकपालः पुरोडाशः सारस्वतश्चरुः। सारस्वतो
द्वादशकपालः पुरोडाशः। अग्नये भगिने ष्टाकपालः पुरोडाशः। प्रधानमुपांशु एवमात्मकेन सांगोपांगेनेत्या
दि सद्यो यक्ष्ये पौर्णमासस्यः। अग्नीषोमावाज्यभागौ। देवा आज्यपा इत्यादि देवता संकल्पं कृत्वा सान्वारं
भणीया पौर्णमासे अध्वर्युं त्वामुं वृणे इति अग्निर्धिष्णुरग्नीषोमाविंद्रो वैमृध प्रधानदेवताः देवा आज्यपाः।
अग्निः स्वि० त्रयो० ऋत्वि० अष्टौ० सद्यो यक्ष्ये० एवमध्वर्यादीन्यथाकालं वृणुयात्॥ अध्वर्युरडादेव हूरित्या
दि अग्निहूयं क्लिष्टस्यो भयोरस्तं श्रौतान्याधानादि कुर्यात्। इध्माबर्हिः संभरणादि कमन्वारंभणीया पूर्णमा
सयोः पृथक् कुर्यात्। बर्हिषी संमृज्य। इंद्रस्य त्वा बाहुभ्यामुद्यच्छे। उर्वंतरिक्षमन्वितं। देवंगमेस्थः सरस्व

यथादैवतमुक्तिनिवाचनंसंनिष्ठत एषेष्टिर्ब्राह्मणतर्पणांतान व्रतविसर्गः ।। इदं प्रायश्चित्तप्रदीपेयज्ञतंत्रे
वस्पष्टं व्रतविसर्गो नामपयस्वती अग्नेव्रतपते प्रायश्चित्ताधाने तु वरणादिगोयज्ञ वर्जं प्रकृतिवन्मतं भ्वो
ना भूते पाणिसंमर्शादि पत्नी यजमानो भयोर्व्रतग्रहणं । अग्नेर्णोत्करं तृणानि संस्तीर्य तेषु स्रुचः सादयित्वा गा
र्हपत्यावेक्षणाद्येव पत्न्या एवं ततः पौर्णमासेष्ट्यंते तंत्रेण व्रतविसर्गः ।। ।। संतिष्ठते त्याधेयं ।। ।।अथ
पुनराधेयं तु अनेन प्रयोगकारेण न लिखितं ।। अतः कारणादन्यप्रयोगकारोक्तं लिख्यते । एतस्यार्थः ।
विच्छिन्नाग्निसंधाने ऋत्विग्वरणादि सर्वं भवति ।। गोपित्र्ययज्ञो न कर्तव्यः ।। न व्रतविसर्गः ।। पौर्णमास्या
गपर्यंतं तत एवाग्नयः ।। पौर्णमासीयागान्वाधानस्य कृतत्वात् ।। ।।अथाग्रयणं ।। ।। वर्षासु श्यामाका
ग्रहणं । शरदि व्रीह्याग्रयणं । वसंते यवाग्रयणं । रेवती पर्वद्वय देव दिने कृत्तिकादि विशाखांतेषु यस्पुण्य
मात्मानुकूलं नक्षत्रं देवनक्षत्र संज्ञं अन्येषामपि नित्यकाम्यनैमित्तिकेष्ट्यादीनामनुक्तकालत्वा
न्नामयं कालः । तस्याद्योक्तेः प्रयोगे पूर्वेद्युर्नांदीमुखं रात्रौ उदकशांतिं प्रातिसरबंध चरुत्वाम्वः
स्नाना क्षिपं चरुं कुर्यात् ।। आग्रयणदेवतानुध्वंस पुण्याहवाचनं गार्हपत्यस्य प । श्चादुपविश्य यया:

पुरस्तादित्यादि स्वर्गकामोग्रयणेन यक्ष्यत इति त्रिरूपांशु त्रिरुच्चैरुक्त्वा आग्रयणेन यक्ष्यमाणो न्वारंभणी
श्रा ययायक्ष्यसंकल्प्यान्वारंभणीयायाइत्यादि श्वः सद्योयक्ष्यइति देवताः संकल्प्य अस्मिन्नुसान्वारंभणी
येश्यामाकग्रयणा। ध्रुवं त्वा महं वृणइत्येवमध्वर्यादीन्यथाकालं वृणुयात् इडादेवद्धूरित्यादिअ
थिद्वर्यं विहृत्तो भयोस्त्वे नेपान्वा धानादिकुर्यादि ष्टिद्वयसंनिपातन्यायेन॥ इध्माबर्हिः संभरणा
दिकं पृथक् दर्शपूर्णमासवत्कुर्यात् संतिष्ठते न्वारंभणीया ब्राह्मणान्तर्पणांता नविसृजते व्रतंपय
स्यती अयेव्रतपतेनकर्त व्यंश्वः प्रातर्हुतेग्निहोत्रे तदानीमेव वा पाणिसंमर्शनादि पात्रासादने स्प्य
नसहे वरुत्तणलीकाले वरूमेक्षणाभतिश्राम्यादृषद्धुपलपिष्टोद्वपनीमेक्षणावर्जं सादयीत
प्रणयने ब्रह्मन्नपः प्रणेष्यामि। अनपाद्यः प्रणयामि। निर्वपः यथादेवतं यद्रूयोगानंतरंगा 30
र्हपत्येस्मार्तवत् आज्यं संस्कृत्य स्रुचि चतुर्गृहीतं गृहीत्वाहवनीये समिधमाधाय स्वाहु
तिर्जुहोति॥ शतायुधाय शतवीर्याय शतोतयेभिमातिषाहे। शतं यो नः शरदो अजीतानिंद्रो

नेषवदंतिदुरितानिविश्वा स्वाहा। इंद्राय इदं। अपरं चतुर्गृहीतं गृहीत्वा। येचत्वारः पथयोदेवयाना अंतराद्या
वापृथिवीवियंति। तेषांयोअज्यानिमजीजितमावहात्तस्मै नोदेवाः परिदत्तेह सर्वे स्वाहा। द्यावापृथिवीभ्या
मिदं। अपरं॰। ग्रीष्मोहेमंतउतनोवसंतःशरद्वर्षाःसुवितंनोअस्तु। तेषामृतूनां शतशारदानांनिवा
तएषामभयेस्यामस्वाहा। ग्रीष्मायऋतुभ्यइदं। अपरं॰। इदुवत्सरायपरिवत्सरायसंवत्सरायकृणुता
बृहन्नमः। तेषांवयंसुमतौयज्ञियानांज्योगजीता अहतास्यामस्वाहा। इदुवत्सरपरिवत्सरसंवत्स
रेभ्य इदं। अपरं॰। भद्रान्नः श्रेयः समनैष्ट देवास्त्वयावसेन समशीमहि त्वा। स नो मयोभूः पितो आविश
शिवस्तोकाय तन्वे स्योनः स्वाहा। देवेभ्य इदं। एवमेव चतुर्गृहीतं पंचधेत्यन्ये पुरस्तात्स्विष्टकृतो वाज्या
नीहोमः। वरुणाल्युपधानकाले आदेवयजं वहेत्सांगारमावसथ्ये तेषु तिरःपवित्रमानीयप्रणीताद
ग्धं वरुणाशीमाधिश्रयति। धृवासिह। तां मदक्षिणमंगारे परिषिंचन्या तन्निर्दग्धमितितिस्तस्या
रःपवित्रं तंडुलानावपति घर्मस्य विश्वायुषः आज्यं निरूप्याधिश्रित्य सोमे पर्यग्निकरोति अग्नेर्हेडं व्य
क्षसे सुकाअग्नि दहंतः श्रपय। तं वावंविसृजेत। अग्नेर्ग्रणोत्कर स्थणा निसर्पनीयत्तेषु सुचःसा

दयति। पत्न्या गार्हपत्यावेक्षणादिहविरुद्वासनेआप्यायतां घृत। तेजसा सोमा यजुष्टमभिघारयामि॥
उद्वासयति प्रिन्तउत्स्नो तिष्ठति ताम ता नो आज्येना परिसंतर्पयति आर्द्रा भुवनस्य गोपाः अधस्ताद भ्यंक्ते
यस्त आत्मा पशुषु प्रविष्टः समंद्धा। अंतर्वेद्यासाद्य स्रुवमभि घारयेत् स्वसादि॥ आज्यभागौ विद्धा मेक्ष
णेन पूर्वार्धाद्घोरो रवद्यं ना हा सोमायानुब्रू३हि। सोमं यज। सोमायेदं। सोमस्याहं देवयज्ययात्रप्रज
यो वपुष्प भिश्च जनिषीयेस्मै नुमं चणं स्विष्टकृतमवदायाज्यस्त्या त्वा स्रुवेणजे होति मधुश्च स्वाहाम
धवइदं। माधवश्च स्वाहा। माधवायेदं। शुक्रश्च स्वाहा। शुक्रायेदं। शुचिश्च स्वाहा। शुचयइदं। नपा
र्वणाहोमः। चरुमेक्षणमादाय वषट्कृते द्व त्वामेक्षणमनुपहृत्य संस्त्रावेणाभिजुहुत्सो ष्टदकृत्या
क्रम्ये स्वाहि। इडाभक्षणं सर्वेषामाश्विलायनोक्तमार्गेणतद्यथा इदं होतुरेवद्धले भागं जुषस्व नः। पि
न्वगाति न्वाबेतोरायस्पोषस्येषिषे तस्य नो रास्व तस्य नो दास्तस्यास्ते भागमशीमहि। सर्वात्मानः ३१
सर्वतनवः सर्ववीराः सर्वपूरुषाः। इत्युक्त्वा अध्वर्युयजमानआग्नीध्रः सर्वस्वं भागं सव्यपाणौ निधाय।
दक्षिणेनाभिमृश्यायुः अग्नो विष्णो प्रजापतयेत्वाग्रहं गृह्णामि महं श्रियै यत्रासेमहोमनात्वाया।

भद्रान्नः श्रेयः समनैष्ट देवा स्त्वयावसेन समशीमहि त्वा। स नो मयोभूः पितवो आविश शं नो भव द्विपदे शं

चतुष्पदे। इति प्राश्याचम्य नाभिमभिमृशेयुः। अमोऽसि प्राण तदृतं ब्रवीम्यमासि सर्वानसि प्रवि

ष्टः। स मे जरां रोगमपनुद्य शरीरादमा म एधि मा मृथा न इन्द्रेति। अन्वाहार्यमासाद्य वासो ददाति। कृति

कृत्तद्वासः इति प्रतिग्रहमन्त्रः। ब्राह्मणो वासः इति। उत्क्षिप्ति वा स्वने सोमस्याहमु॰ यजमानभागप्राश

ने प्रजापतेर्विभान्नामलोकस्तेन स्वरूपेणाग्निः प्रथमः प्राश्नातु स हि वेद यथा हविः। शिवा अस्मभ्य

मोषधीः कृणोतु विश्वे चर्षणयः। इति ब्राह्मणतर्पणांतं समानं॰ नन्व। प्रकृतौ त्रयाणां विकृतौ द्वादशानामिति

केचित्। संतिष्ठते श्यामाकाग्रयणं॥ ॥अथ शारदी व्रीह्याग्रयणं॥ ॥स्नानादि पंचके कृतायाः पुर

स्तादेस्यादि व्रीह्याग्रयणेन यक्ष्ये इति। त्रिरुपांशु त्रिरुच्चैरुक्त्वा व्रीह्याग्रयणस्याग्नीषोमावाज्यभागौ।

ऐंद्राग्नो द्वादशकपालः पुरोडाशः। वैश्वदेवश्चरुः। द्यावापृथिव्य एककपालः पुरोडाशः। देवा आज्यपाः।

इंद्राग्नी उत्रैः। विश्वे देवा द्यावापृथिव्यावित्युपांशु॰ कर्मणाम्॰ सद्यो वा यस्य इति देवतासंकल्पं कुर्यात्। र

धसंनहनेन तमस्त्वां त्रयोदश॰ यथास्थितमितरन्ये॰। पात्रासादने द्वादशकपालं ऐंद्राग्नार्थं वैश्व

देवी चरुस्थालीं द्यावापृथिव्यमश्वत्थाफ मात्रमेव कपालीमिति स्क्वे न सह चरुस्थालीमेक्षणे न सह चरुमेक्षणं
दारुपात्र्यां सह एककपालो हासनार्थं पात्रांतरमिति स्यात् दिवैश्वदेवश्चरोः पयसि श्रपणप्रक्षेपयः आनीयतु
थैव पात्रांतरेण पयः प्रणयेत्। पयः प्रणेष्यामीति निर्वापादिषु यथादेवतमूहः। आज्यानी होमः पूर्ववत्
त्। अधिवपनात् सर्वं चरुपुरोडाशीयविभागः। चरुस्थाल्या उत्तरतः एककपालमुपदधाति। ध्रुवमसि पृ
थिवीं दृंह अंगाराधिवासनेऽभ्यूहणा स्व। योगमंत्रे पयद्दुर्मे कपाले नुतौ पुरुस्तद पिव्रत एवं वि
मोकः। एकैककपालो हासनेन पात्रांतरे। स्योनं ते सदनं नरस्तुपस्तीर्यतस्मिन्नेककपालमुद्वास्यावधाया
प्रभृतमाज्यमानीयाभिघारं कुर्यात्। ऐंद्राग्नयागांतरं विश्वेभ्यो देवेभ्योनुब्रूहि अपराधार्द्धदवदायापूर्वार्धा
त्कृष्या दवत्साभिघारयति न प्रत्यनक्ति अग्नासोऽश्रावयात्र त्याश्रावितेविश्वान्देवानेयज वषट्कृतेनुहोति। विश्वे
षां देवानामहं देवयज्ययाप्राणे: सायुज्यं गमेयमित्यनुमंत्रणं। द्यावापृथिवीभ्यामनुब्रूहीत्युत्कापु
रोडाशं सर्वं जुह्वामाधायात्तायमानीयाभिघारयति आश्राव्य प्रत्याश्राविते द्यावापृथिवी यजा वषट्कृ ३२
ते स्रुवा अपर्याविर्तयन्न प्रतीति छं जुहुयात् संस्रावेणाभिजुहोति। द्यावापृथिव्योरहं देवयज्ययोभ
योर्लोकयो रूध्यासं अस्मान्न प्रतिष्ठां गमेयमिति वानुमंत्रणं। स्विष्टकृदिडयोरंतरेककपालस्याश्रयाव

दानं। स्विष्टकृतः पूर्वमाज्यस्थाल्याः स्रुवेण जुहोति। नभश्च स्वाहा नभस इदं। नभस्यश्च स्वाहा। नभस्याय इदं। इष य
श्च स्वाहा। इषाय इदं। ऊर्जश्च स्वाहा। ऊर्जाय इदं। स्विष्टकृतमेक्षणमनु सहस्य सं स्रावेणाभिजुहोति। सादिश्या
माकाग्रयणवदिडाप्राशनं। सर्वत्र नवभोजनं स्विष्टकृत्प्रात्। अन्वाहार्यमाशायां प्रथमकुंभं ददाति रुद्रा
यणामिति प्रतिग्रहः ६ ब्राह्मणा गामिति वा यथादैवतमुद्दिश्य वाचनं। यजमानभागप्राशने प्रजापतये त्वेतस्यरुग
मे भद्रान्नः श्रेयः सम० स नो मयोभूः पितो० नः। ब्राह्मणतर्पणांतं समानं॥ ॥ संतिष्ठते व्रीह्याग्रयणं॥
॥ तत्र श्यामव्रीह्याग्रयणोक्त देवतास्सैव सर्वेतिकर्तव्यता व्रीहिशब्दस्थाने यवशब्दप्रयोगः॥ स्विष्टकृत पूर्वमा
ज्यस्थाल्याः स्रुवेण जुहोति॥ सहश्च स्वाहा। सहस इदं। सहस्यश्च स्वाहा। सहस्याय इदं। तपश्च स्वाहा। त
पस इदं। तपस्यश्च स्वाहा। तपस्याय इदं। यजमानभागप्राशने एतमु त्यं मधुना संयुतं यवं सरस्वत्या अधि
मनावचर्कृषुः। इन्द्र आसीत्सीरपतिः शतक्रतुः कीनाशा आसन्मरुतः सुदानवः॥ ब्राह्मणतर्पणांतं समा
नं॥ ॥ संतिष्ठते यवाग्रयणं कार्यमिदं वैकल्पिकं॥ ॥ श्यामाकाग्रयणस्य व्रीह्याग्रयणेन सह समान
तंत्रता पक्षे व्रीह्याग्रयणे विशेषः॥ इंद्राग्नी विश्वेदेवाः सोमो द्यावापृथिवी इति॥ देवता संकल्पे इंद्राग्नी उद्दैः।

अन्यादेवताउपांशु॰॥ एवं॰ कर्मणा एतादेवतास्तंत्रेण बार्हद्यो॥ इंद्राग्नी अवसा॰ गा। भिर्विप्रः॰ इतरआरभ्यउपां
शु। विश्वेदेवास॰। येके च॰। सोमयास्ते॰। यातेधामानि॰। महीद्यौः॰। प्रपर्वते॰। इंद्राग्नी विश्वान्देवान्सोमं द्यावापृ
थिवीआवहा द्यावापृथिवीआवहेति आश्वलायने सूत्रे छांदसमेव द्यावापृथिवीइत्यस्य श्रुतत्वाद्विधित्रा
त्वस्यमंत्रत्वेभावस्यातेन चोदनेस्यौद्ध्यधिकरणाच्छांदसप्रयोक्तव्यमितिमहोक्तिः॥ पात्रासादनोहूतो
यांसमेक्षणं वरुणाग्नां ली अन्वास्य प्रणयने निर्वापपात्र्यां व्रीहीन् श्यामाकप्रदेन निधाय धूरसी त्यादि
वीक्षणं किंत्वारूनिरूप्यनेन प्रतिथान्यमावर्त्तते निरुप्तानिशिष्टाभिमर्शनेकीकरणमंत्रः प्रति धान्य
मावर्त्तते॥ आहवनीयावेक्षणादितंत्रेण। उर्वंतरिक्षमन्विहि॥ अदित्यास्त्वोपस्थे सादयामि। अग्ने ह
व्यं रक्षस्व॥ अथ वीक्षणादितंत्रेण॥ मित्रस्यत्वा चक्षुषा प्रेक्षे मा भेर्मा संविक्था मा त्वा हिंसिषं।
उरु वाताय॥ निरुप्तानभिमन्त्रामपितथ॥ इदं देवानां॥ इदमुनः सह॥ स्फात्यैत्वा नारात्यै॥ प्रो ३२
क्षणादियथादैवतं॥ उभयोर्भेदेन प्रोक्षणं॥ व्रीहिष्वेवहविष्कृताह्वानं व्रीह्यवघातकाले श्यामा
कानुपोप्यछते॥ तंदुलप्रक्षालननिनयनांते श्यामाकान्मंत्रेणोलूखले निधाय मावहंतीत्यादि पुनस्त्रिः

फलीकरणशेषः॥ भिन्नबीजत्वान्न विभागः॥ श्यामाकानामित्यादीनां बीजत्वं तदनुसारेण भावनी
यं॥ मुख्यक्रमेणोपहोमौ॥ यस्मिन्देशे श्यामाकादीनामन्यतमस्याभावस्तत्र तदाग्रयणलोपः
द्यावापृथिवीययागमाज्येनैव केचिदिच्छंति॥ व्रीह्याग्रयणे श्यामाकप्रस्तरं वा कुर्यात्॥ तेन सौम्या
ग्रयणमिष्टं भवति सौम्यं निरूप्यं वा ऐंद्राग्न्यादीनां निर्वापः॥ तदा यजमानभागप्राशनेन तदीय एवमं
त्रः॥ ॥संतिष्ठत आग्रयणं॥ ॥ ॥अनेन प्रीयतां देवो भगवान्मंगलेश्वरः॥ लक्ष्मीनृसिंहः
सर्वेषामस्माकं कुलदैवतं॥ ॥इति श्रौताधानप्रयोगः समाप्तः॥ ग्रंथसंख्या॥८५०॥॥ ३४